पं. ८. ६

२०

॥ चित्रदीपश्लोक॥२०॥

Title → चित्रदीप व्याख्या (संपूर्ण)
Author → रामकृष्ण.
Date → ?
Subject → Vedanta.
folios → 46
Xerox p. → 92
Acc. No. → ~~243~~ M1402

व्यापकमित्यर्थः।

चि॰दी॰
॥१॥

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ॥ प्रस-
न्नवदनं ध्यायेत्सर्वविघ्नोपशांतये ॥१॥ यस्य श्रवणमात्रेण विघ्ना दूरं प्रयांति हि ॥ वं-
देहं दंतिवक्त्रं तं वांछितार्थप्रदायकं ॥ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ क्रि-
यते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी ॥२॥ चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिस-
रणाय परमात्मनीति पदेनेष्टदेवतातत्त्वानुसंध्यानलक्षणं मंगलमाचरन्स्वग्रंथ-

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं ॥ परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं ॥१॥

स्य वेदांतप्रकरणत्वात्तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधायाऽध्यारोपा-
पवादाभ्यां निष्प्रपंचं प्रपंच्यत इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थि-
तिप्रकारं सदृष्टांतं प्रतिजानीते ॥ ॥ यथेति ॥ ॥ चित्रपटे यथा वक्ष्यमाणाना-
मवस्थानां चतुष्टयं दृष्टं तथा एवं परमात्मन्यपि वक्ष्यमाणमवस्थाचतुष्टयं ज्ञेयमि-
ति ॥१॥

किंतदित्याकांक्षायां दृष्टांतदार्ष्टांतिकयोरप्यवस्थाचतुष्टयं क्रमेणोद्दिशति ॥ यथेति धौतो घ
ट्टितो लांछितो रंजितश्चैवं प्रकारास्त्वतस्तोऽवस्था यथा चित्रपटे ऽपलभ्यंते तथा परमात्म
न्यपि चिदंतर्यामीसूत्रात्मा विराट् चेत्यवस्थाचतुष्टयं बोद्धव्यमित्यर्थः ॥ दृष्टांतस्थितानां

यथा धौतो घट्टितश्च लांछितो रंजितः पटः ॥ चिदंतर्यामीसूत्रात्मा विराट् चात्मा तथे
र्यते ॥ २ ॥ स्वतः शुभ्रोऽत्र धौतः स्याद् घट्टितोऽन्नविलेपनात् ॥ मष्याकारैर्लांछितः
स्याद्रंजितो वर्णपूरणात् ॥ ३ ॥

मत्र स्थानां स्वरूपं क्रमेणानुसादयति ॥ स्वत इति ॥ अत्र आसु अवस्थासु मध्ये स्वतद्र
व्यांतरसंबंधं विना शुभ्रो धौत इत्युच्यते ॥ अन्नेन लिप्तो घट्टितः ॥ मषीमयैराका
रैर्युक्तो लांछितः यथायोग्यं वर्णैः पूरितो रंजितः स्यात् ॥ ३ ॥ सांब मूर्तिर्जयति ॥

3

दार्ष्टांतिके तद्व्युत्पादयति॥ स्वत इति॥ परः परमात्मा स्वतः मायातत्कार्यरहितः चि
त् इत्युच्यते॥ मायायोगादंतर्यामी॥ अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयो

स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः॥ सूत्रात्मा स्थूलसृष्ट्यैव विराडि
त्युच्यते परः॥४॥ ब्रह्माद्याः स्तंबपर्यंताः प्राणिनोऽत्र जडा अपि॥ उत्तमाध
मभावेन वर्त्तंते पटचित्रवत्॥५॥

गात्सूत्रात्मा॥ पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति॥
ननु परमात्मनः चित्रपटस्थानीयत्वे तदाश्रितानि चित्राणि वक्तव्यानीत्यत
आह॥ ब्रह्माद्या इति॥ अत्र परमात्मनि उत्तमाधमभावेन वर्त्तमानं ब्रह्मादि
बपर्यंतं चेतनात्मकं गिरिनद्यादिजडात्मकं च चित्रस्थानीयमित्यर्थः॥५॥ छ

ब्रह्मादिजगतश्चेतनस्थानीयत्वेकारणंवक्तुंदृष्टांतमाह॥चित्रेति॥यथाचित्रेलिखिता
नांमनुष्यादिशरीराणामेवनानावर्णापेतावस्त्रविशेषालिख्यंते॥तेचशीताद्य
निवारकत्वाद्वस्त्राभासाएवादार्ष्टांतिकमाह॥पृथगिति॥एवंपरमात्मन्यारोपि
तानांदेवादीनांशरीरीणामेवजीवनामानश्चिदाभासाःप्रत्येकंकल्प्यंतेन

चित्रार्पितमनुष्याणांवस्त्राभासाःपृथक्पृथक्॥चित्राधारेणवस्त्रेणास
दृशाइवकल्पिताः॥६॥पृथक्पृथक्चिदाभासाश्चैतन्याध्यस्तदेहिनां॥
कल्प्यंतेजीवनामानोबहुधासंसरंत्यमी॥७॥

पर्वतादीनां॥तेषांकल्पनेकारणमाह॥बहुधेति॥अमीजीवादेवतिर्यङ्
मनुष्यादिशरीरंप्राप्यबहुधासंसरंतिनपरमात्मातस्यनिर्विकारत्वा
दित्यभिप्रायः॥७॥

चि॰ दी॰

॥३॥

ननु सर्वे वादिनो लौकिकाश्चात्मन एव संसार इति वदंति तत्र किं कारणमित्याशंक्याज्ञानमेव कारणमिति सदृष्टांतमाह॥वस्त्राभासेति॥गिरिनद्यादीनां तु चिदाभाससंबंधाभावं दृष्टांतपुरःसरमाह॥चित्रस्थेति॥प्रयोजनाभावादिति भावः॥एवमात्मन्या

वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान्॥वदंत्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः॥८॥चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते॥सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा नहि॥९॥संसारः परमार्थोयं संलग्नः स्वात्मवस्तुनि॥इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्तते॥१०॥आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः॥इति बोधो भवेद्विद्या लभ्यतेसौ विचारणात्॥११॥

रोपितस्य संसारस्य ज्ञाननिवर्त्यत्वसिद्धये तन्मूलभूतामविद्यामाह॥संसार इति॥केयं विद्या तल्लाभोपायश्च क इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति॥आत्माभासस्येति॥चिदाभासस्येत्यर्थः॥११॥ ॥ ॥

५ ॥३

विचाराल्लभ्यते विद्येत्युक्तं कस्य विचाराल्लभ्यते विद्येत्याशंक्याह सदेति॥ ननु परमा
त्माविचार्यतां मोक्षावस्थायां फलरूपेणावस्थाना जीवजगतो विचारः कोपयुज्यत इत्या
शंक्य तयोरपि बाधेन परमात्मावशेषणाउपयुज्यत इत्याह॥ जीवभावेति॥ ननु विचा

सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः॥ जीवभावजगद्भावबाधे स्वा
त्मैव शिष्यते॥१२॥ नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः॥
नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः॥१३॥

रेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्द
स्य विवक्षितमर्थं विपक्षे दंडं चाह॥ नाप्रतीतिरिति॥ सुषुप्तिमूर्छादौ स्वत एव
द्वैताप्रतीतिसद्भावात्तत्त्वज्ञानं विनापि मुक्तिः स्यादित्यर्थः॥१३॥ सांवमत्त निर्जयन्ति॥

ल

चि० दी०

॥४॥

त्वात्मैव शिष्यत इत्यनेनापि परमात्मनः सत्त्वज्ञानमेव विवक्ष्यते न तदतिरिक्तजगद्वि-
स्मृतिर्जीवन्मुक्त्यभावप्रसंगादित्याह॥ परमात्मेति॥ सदा विचारयेदित्युक्त्या देहपा-

परमात्मावशेषोपि तत्सत्त्वविनिश्चयः॥ न जगद्विस्मृतिर्नो चेज्जी-
वन्मुक्तिर्न संभवेत्॥१४॥ परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा॥
तत्रापरोक्षविद्याप्तौ विचारोयं समाप्यते॥१५॥ अस्ति ब्रह्मेति चेद्वेद परो-
क्षज्ञानमेव तत्॥ अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते॥१६॥ ७॥

विद्या २

तपर्यंतं विचारप्रसक्तौ सत्यां तस्यावधिमाह॥ परोक्षा चापरोक्षेति॥ विचार
जन्या विद्या परोक्षत्वापरोक्षत्वभेदेन द्वेधेत्युक्तं॥ तयोरुभयोः स्वरूपं क्रमेण द
र्शयति॥ अस्ति ब्रह्मेति चेदिति॥ ७॥ ॥ रत्नादिसंहर्त्री मां पायात्॥

॥४॥

कुटस्थदीप ४

एवंविधसाक्षात्कारासाधारणकारणमात्मतत्त्वविवेचनं प्रतिजानीते॥ तत्साक्षात्कारेति॥ ये
न साक्षात्कारेण पुमान्सद्य एव विमुच्यते॥ तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः॥१६
चिदात्मनः पारमार्थिकमेकत्वं निश्चेतुं व्यवहारदशायां प्रतीयमानं चेतन्यभेदमुद्दि
शति॥ एकस्याश्चितेश्चातुर्विध्ये दृष्टांतमाह॥ घटाकाशेति॥१८॥ घटावच्छिन्नस्य घटा

तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते॥ येनायं सर्वसंसारात्सद्य एव विमुच्य
ते॥१७॥ कुटस्थो ब्रह्मजीवेशावित्येवं चिच्चतुर्विधा॥ घटाकाशमहाकाशौ जलाका
शाभ्रखे यथा॥१८॥ घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिंबितः॥ साभ्रनक्षत्र आ
काशो जलाकाश उदीर्यते॥१९॥

काशस्य तदनवच्छिन्नस्य च महाकाशस्य प्रसिद्धत्वात्तौ विहायाप्रसिद्धं जलाकाशं व्यु
त्पादयति॥ घटावच्छिन्नेति॥ —— आकाशे यदुदकमस्ति तत्र जले प्रतिबिंबितो

महाकाशस्येति॥ अभ्राकाशं व्युत्पादयति॥ तत्र मेघमंडले यज्जलं तस्मिन्नित्यर्थः॥२०॥ ननु मे
घजलस्याप्रतीयमानत्वान्नभसस्तत्र कथं प्रतिबिंबितत्वज्ञानमित्याशंक्याह॥ मेघांशेति॥
मेघस्थस्य जलस्य प्रत्यक्षेणानुपलंभेपि वृष्टिलक्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मा
वयवरूपमस्तीत्यनुमीयते। उदकत्वेनैव लिंगेन॥ विमलं जलमाकाशप्रतिबिंबवद्दृष्टं तु

मेघांशरूपमुदकं तुषाराकारसंस्थितं॥ तत्र खप्रतिबिंबोयं नीरत्वादनुमीयते॥२१॥ अ
धिष्ठानतया देहद्वयावच्छिन्नचेतनः॥ कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते॥२२॥
१ महाकाशस्य मध्ये यन्मेघमंजलमिष्यते॥ प्रतिबिंबतया तत्र मेघाकाशो जले स्थितः॥२०

मर्हति। जलत्वात् घटगतजलवदित्यनुमानेन मेघांशरूपे जलेप्याकाशप्रतिबिंबसद्भावोवगम्य
त इत्यर्थः॥२१॥ एवं दृष्टांतभूतमाकाशचतुष्टयं व्युत्पाद्य दार्ष्टांतिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादय
ति॥ अधिष्ठानेति॥ पंचीकृतापंचीकृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्या
कल्पितस्याधारतया वर्तमानत्वेन ताभ्यामवच्छिन्न आत्मा कूटस्थ इत्युच्यते। तत्र कूटस्थश

एवंकूटस्थं व्युदस्य जीवस्य कूटस्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्सक्षपातित्वात्तं व्युदस्यति॥ कू-
टस्थ इति॥ तस्य जीवशब्दाभिधेयत्वेनिमित्तमाह॥ प्राणानामिति॥ कूटस्थातिरिक्तजीवकल्प-
नप्रयोजनमित्याशंक्याविकारिणः कूटस्थस्य संसारासंभवात्तन्निर्वाहार्थं सोंगीकं साह॥
संसारेति॥२३॥ ननु जीवातिरिक्तः कूटस्थोस्ति चेत्किमिति न प्रतिभासत इत्याशंक्य जीवेनाति-

कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः॥ प्राणानां धारणाज्जीवः संसारेण स युज्यते॥
जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः॥ तथा जीवेन कूटस्थः सोन्योन्याध्यास उच्य-
ते॥२४॥

रोहितत्वादिति सदृष्टांतमाह॥ जलेति॥ नन्वेतत्सतिरोधानं न क्वापि शास्त्रे प्रतिपादि-
तमित्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानात्मैवमित्याह॥ सोन्योन्याध्यास इति॥ उच्य-
त भाष्यादिष्विति शेषः॥२४॥ ॥श्रीवामनरूपधराय श्रीरंगायनमोस्तु॥ छ॥ ॥

नन्वयमेवाध्यासश्छेदस्य कारणरूपाविद्यावक्तव्येसाक्षांस्यजीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविद्येसाह॥ अयमिति॥ पूर्वोक्तस्यजीवस्याविद्याकल्पितैस्यष्टीकूटस्था

अयंजीवोनकूटस्थंविविनक्तिकदाचन॥ अनादिरविवेकोयंमूलाविद्येतिगम्यतां॥१५॥ विक्षेपावृतिरूपाभ्यांद्विधाविद्याव्यवस्थिता॥
नभातिनास्तिकूटस्थइत्यापादनमावृतिः॥१६॥

याविद्यांविभजते॥ विक्षेपेति॥ विक्षेपहेतुत्वेनाभ्यर्हितत्वादावृत्तिंप्रथमंलक्षयति॥ नभातीति॥ कूटस्थोनभातिनप्रकाशतेनास्तिचेतिव्यवहारहेतुरावरणमित्य
र्थः॥१६॥

नन्वनुभवस्तत्वनिश्चायक एव तथापन्नुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोऽप्यनु
पेतव्य इत्याशंक्य मनन्यपतर्कस्यानुभवानुसारेणैव तर्कोवर्णनीयो न तद्विरोधेनेत्याह ॥ बुध्यारो
हायेति ॥ कोसावनुभवो यदनुसारेण तर्को वर्णनीय इत्याशंक्यायां प्रशंसन्नविद्यादिगोच

बुध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति ॥ स्वानुभूत्यनुसारेण तर्क्यतां मा
कुतर्क्यतां ॥३०॥ स्वानुभूतिरविद्यायामात्मनो च प्रदर्शिता ॥ अतः कूटस्थ
चैतन्यमविरोधीति तर्क्यतां ॥३१॥ तच्चेद्विरोधि चेन्नेयमात्मा लिहर्नुभूयतां ॥

रमनुभवं स्मारयति ॥ स्वानुभूतिरिति ॥ फलितमाह ॥ अत इति ॥ तमेव तर्कमभीनी
यदर्शयति ॥ तच्चेदिति ॥ अविद्यावरणसाधकचैतन्यस्यैव तद्विरोधित्वेऽविद्याप्रतीति
रेव न स्यादिति भावः ॥३१॥

चि० दी०
॥८॥

ननु भवन्मते आत्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते तेजस्तिमिरयोरिव वि-
रुद्धस्वभावत्वेन तयोः संबंधानुपपत्तेरविद्याभावे च तत्कृतमावरणं दुर्निरूपं स्यात्त-
दभावे च तन्मूलकस्य विक्षेपस्यासंभवः विक्षेपाभावे च ज्ञाननिवर्त्यस्यानर्थस्याभा-
वात् ज्ञानवैयर्थ्यं तत्प्रतिपादकं शास्त्रमप्रमाणं स्यादित्याशंक्यैतत्सर्वं दर्वोक्त्या

स्वप्रकाशे कुतो विद्या तां विना कथमावृतिः॥ इत्यादि तर्कजालानि स्वानुभूति-
र्ग्रसत्यसौ ॥२८॥ स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः॥ कथं वा ता-
र्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् ॥२९॥

वि

नुभवबाधितमाह॥ स्वप्रकाश इति॥ न हि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः॥२८॥
नं च नुभवस्योक्ततर्कविरोधेनाभासता न तेन तत्त्वनिश्चय इत्याशंक्यानुभवप्रामा-
ण्यानभ्युपगमे केवलतर्कस्यानिश्चायकत्वस्य स्वेनैवाभ्युपगतत्वान्न तार्किकस्य तत्त्व

॥८॥

१ न२

नन्वविद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाणमिति साक्षिव्यलोकानुभव एवेत्याह।
अज्ञानीति॥ विदुषा कूटस्थं किं जानासीति पृष्टोऽज्ञानी तं जानामीत्यज्ञानमनुभू

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि॥२७॥

य वक्ति। अयमविद्यानुभवः। न केवलमज्ञानानुभवमेव वक्ति अपि तु नास्ति
न भाति कूटस्थ इति कूटस्थाभावाभाने चानुभूय वदति। अयमावरणानुभवः॥
अनयोरुभयत्रानुभवः प्रमाणमिति भावः॥२७॥ ६॥

चि०दी०
॥८॥

नि

तर्ह्यविद्यायाः को विरोधीत्यत आह॥ विवेक इति॥ विवेकरूपनिवर्त्तकाद्रज्जवंशामविवेकस्याविद्या-
विरोधित्वं कुत इत्यत आह॥ तत्त्वज्ञानीति॥ एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह॥
अविद्येति॥ पूर्वोक्ताविद्यावरणावृतकूटस्थप्रदेशगाल्यारोपितस्थूलसूक्ष्मशरीरसहितं चिदा-

विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि दृश्यतां॥ ३२॥ अविद्यावृतकूटस्थे देहद्वय-
युता चितिः॥ शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि॥ ३३॥ इदमंशस्य
सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते॥ स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽन्यगा॥ ३४॥

दाभासो विक्षेपाध्यास इत्यर्थः॥ अस्य विक्षेपस्याध्यासत्वसिद्धये शुक्तिरजताध्यास-
साम्यं दर्शयति॥ इदमंशस्येति॥ शुक्तिकायां स्थितं पुरोदेशादिसंबंधित्वमबाध्यत्वं च
यथारोपिते रजतेऽवभासते॥ एवं स्वयंत्वं वस्तुत्वं च कूटस्थनिष्ठमारोपिते चिदाभा-
सेऽवभासत इत्यर्थः॥ ३४॥ ॥

॥८॥

एवं सामान्यांशप्रतीतिमुत्पद्य तत्र प्रदर्श्यविशेषप्रतीतिसाम्यं दर्शयति॥ नीलेति॥ साम्यांतरं दर्शयति। आरोपितस्येति। दृष्टांते शुक्तिस्थले आरोपितपदार्थस्वरूप्यनामरूप्यमिति नामयथा एवं कूटस्थे कल्पितचिदाभासरूपविक्षेपस्य परवीक्षस्याहमिति नामेत्यर्थः।

नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं। असंगानंदताद्येवं कूटस्थेऽपि तिरोहितं॥३५॥ आरोपितस्य दृष्टांते रूप्यं नाम यथा तथा॥ कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः॥३६॥ इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते॥३७॥

ननु दृष्टांते पुरोवर्तिनि शुक्तिशकले इंद्रियसंन्निकर्षे जाते सति रूप्यमिदमिति तदतिरिक्तरजताभिमान उपपद्यते नैवं दार्ष्टांतिके आत्मातिरिक्तवस्त्वभिमान इदमंशस्यात्रापि स्वप्रकाशतया चिदात्म[illegible]न्यवभासमाने तदतिरिक्ताहमित्यभिमान

॥१॥
त२
त्व१

ननु स्वयमहं　शब्दयोरेकार्थत्वाल्लेपं दशान्तदार्शीतिकयोः साम्यमिसाशंक्येदं रूप्य शब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्रसाम्यान्नेव मिसात॥ इदं रूप्यत इति॥ तेन स्वयमहं शब्दयोर्नैकार्थत्वमिसर्थः। स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लौकिकप्रयोगं तावद्दर्शोति। देवदत्त इति॥ भवत्वयं प्रयोगः कथ

इदं रूप्यते भिन्ने स्वसाहं ते तथेष्यतां॥ सामान्यं च विशेषश्च ह्युभयत्रापि ——
॥२॥ देवदत्तः स्वयं गछेत्वं वीक्षस्व स्वयं तथा॥ अहं स्वयं न शक्नोमीसेवं लोके प्रयुज्यते॥२१॥ इदं रूप्यमिदं वस्त्रमितियद्वदिदं तथा॥ असौ त्वमहमिसेषु स्वयमित्यभिमन्यते॥१०॥

मेनावता स्वयं शब्दार्थस्य सामान्यरूपत्वमिसाशंक्येदं शब्दार्थवदिसाह॥ इदं रूप्यमिति॥ यथा रूप्यवस्त्रादौ सर्वत्रेदं शब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सामान्यरूपत्वं तथा असौ त्वमहमिसादौ सर्वत्र स्वयं शब्दस्य प्रयोगात्तदर्थस्यापि सामान्यरू

न खलु स्वयमहंशब्दार्थयोर्लोके भेदः एतावता कूटस्थात्वनिष्क्रिमायातमितिपृच्छति॥ अहंत्वादिति। सामान्यरूपः स्वयंशब्दार्थ एवं कूटस्थ इतीदमायातमित्याह॥ स्वयंशब्दार्थ इति॥ ननु स्वत्वरूपो धर्मोऽन्यत्वं निवारयति। न कूटस्थत्वं बोधयतीति शंक

असंत्वाद्विघतो स्वत्वं कूटस्थे तेन किं त्वव॥ स्वयंशब्दार्थ एवैष कूटस्थ इ
ति मतं वेत्॥ ५॥ अन्यत्ववारकं स्वत्वमिति चेदन्यवारणं॥ कूटस्थ
स्यात्मतां वक्तुमिष्टमेव हि तद्भवेत्॥ ६॥

ते॥ अन्यत्ववारकमिति॥ स्वयंशब्दार्थस्य कूटस्थैः तत्त्वा स्वत्वेनान्यवारणमिष्टमेवेति परिहरति। अन्यवारणं कूटस्येति॥ ६॥

श्लो २

ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिव सार्थत्वाभावा
त्कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमित्याशंक्य हस्तकरादिशब्दवदेकार्थत्वोपपत्ते
र्मैवमिति परिहरति। स्वयमात्मेति। पर्यायत्वे सहप्रयोगाभावं हेतुमाह॥ तेन

स्वयमात्मेति पर्यायौ तेन लोके तयोः सह॥ प्रयोगो नास्त्यतः स्वत्वमात्म
त्वं चान्यवारकं॥४३॥ घटः स्वयं न जानातीत्येवं स्वत्वं घटादिषु॥ अचैत
नेषु दृष्टं चेद्दृश्यतामात्मतास्त्वतः॥४४॥

लोक इति। फलितमाह॥ अतः स्वत्वमिति। ननु घटादिष्वचेतनेष्वपि स्वयंशब्द
स्य प्रयोगदर्शनात् स्वयमात्मनोरेकत्वं न घटत इति शंकते। घट इति। घटादिष्व
पि स्फुरणरूपेणात्मचैतन्यस्य सत्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत इत्याह।

ननु घटादिष्वप्यात्मचैतन्यस्य सत्त्वे चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशंक्य चिद
आभाससत्त्वासत्त्वलक्षणकारणसद्भावान्मैवमिति परिहरति। चेतन इति। ननु चेतना
चेतनविभागस्य चिदाभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमेऽचेतनेष्वात्मसत्त्वाभ्यु

चेतनाचेतनभिदा कूटस्थात्मकृता नहि। किंतु बुद्धिकृताभाससत्त्वेनेत्यव
गम्यतां॥४५॥ यथा चेतन आभासः कूटस्थे भ्रांतिकल्पितः॥ अचेतनो
घटादिश्च तथा तत्रैव कल्पितः॥४६॥

पगमो निष्प्रयोजनः स्यादित्याशंक्य चेतनाचेतनविभागहेतुत्वेन कूटस्थस्यान
भ्युपगम्यत्वेऽप्यचेतनकल्पनाधिष्ठानत्वेन कूटस्थोऽभ्युपगंतव्य इत्यभिप्रायेणाघ
टादेस्तत्र कल्पितत्वं सदृष्टांतमाह॥ यथा चेतन इति॥४६॥

चि॰ दा॰
॥११॥

स्वत्वालत्वयोरेकत्वेऽतिप्रसंगं शंकते॥ तन्नेदं तेऽपीति॥ त्वमहमादिषु सर्वत्रानुगतस्य
स्वत्वस्यैव तत्रानुगतयोस्तन्नेदं तयोरप्यालस्वरूपता किं न स्यादिति भावः॥ तन्नेदंत
याऽऽलत्वाधिकरणत्वादालत्वं न संभवतीत्याह॥ ते आलत्वेऽपीति॥ तन्नेदं ते स्वत्वे

तन्नेदं तेऽपि स्वत्वमिव त्वमहमादिषु॥ सर्वत्रानुगते ते न तयोरप्याल
तेति चेत्॥ ४७॥ ते आलत्वेऽप्यनुगते तत्तेदं ते तत्तस्तयोः॥ आलत्वं नैव
संभाव्यं संप्यत्कादेर्यथा तथा॥ ४८॥

मिव यद्यपि त्वमहमादिष्वनुगते तथापि तेष्वनुवर्त्तमाने आलत्वेऽप्यनुगते तदाल
त्वमिदमालत्वमित्यादिव्यवहारसंभवादतस्तयोरालत्वाधिकरणत्वादालस्वरू
पता न संभाव्यते। तत्र दृष्टांतः। संप्यत्कादेरिति। आसेत्वं सम्यगालत्वं न संप्यगि

॥११॥

एवं प्रासंगिकं परिसमाप्य प्रकलितं प्रदर्शनाय लोकप्रसिद्धमर्थमनुवदति। तन्नेदं तेइति। तन्न प्रतियो-
गित्वमिदंतायास्तदिदमिति॥ स्वत्वप्रतियोगित्वमन्यत्वस्य स्वयमन्यदिति त्वंताप्रतियोगित्व-
महंतायास्त्वमहमिति। लोके प्रसिद्धत्वेन प्रयोगदर्शनात्प्रसिद्धमित्यर्थः। भवत्वेवं लोके

तन्नेदंते स्वतान्यत्वे त्वंताहंते परस्परं। प्रतिद्वंद्वितया लोके प्रसिद्धे नास्ति संशयः॥४९॥
अन्यतायाः प्रतिद्वंद्वी स्वयं कूटस्थ इष्यतां। त्वंतायाः प्रतियोग्येषोऽहमित्यात्मनि
कल्पितः॥५०॥ अहंतास्वत्वयोर्भेदे रूपतेदंतयोरिव। स्पष्टेऽपि मोहमापन्ना
एकत्वं प्रतिपेदिरे॥५१॥

प्रकृते किमायातं तत्राह। अन्यतायाः इति। अन्यत्वप्रतियोगी स्वयंशब्दार्थः। त्वंताप्रतियोग्य-
आ हंशब्दार्थश्चिदाभासः कूटस्थकल्पित इत्यर्थः। ननु केन प्रकारेण जीवकूटस्थयोर्भेदे सत्यपि
सर्वस्य ऐक्यमिति न जानंतीत्याशंक्याह। अहंतेति। बुद्धिसाक्षिणः कूटस्थस्य बुद्ध्याभास-
साक्षिकस्तु भिरशक्यत्वादहमिति प्रतिभाससमानयोर्जीवकूटस्थयोर्भ्रान्त्या ऐकत्वं प्रतिपन्ना इ

नन्वस्तु जीवकूटस्थयोरेकत्वभ्रमस्य किंकारणमित्यपेक्षायामाह। तादात्म्येति। अत्रास्मिन्ग्रंथेऽना
दिरविवेकोऽयमित्युक्तोऽध्यासोऽविद्यैवपूर्वः। यतोऽविद्याकार्यत्वमस्यातोऽविद्यानिवर्तकज्ञानेनैव
तन्निवृत्तिरित्याह। अविद्यायामिति। नन्वध्यासस्याविद्याकार्यत्वात्तन्निवृत्त्या ... निवृ
त्तिरिति तदनुपपन्नं ब्रह्मात्मैकत्वविद्यायामुत्पन्नायामप्यविद्याकार्यस्य देहादेरुपलभ्यमा

तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः॥ अविद्यायां निवृत्तायां तत्कार्यं विनि
वर्त्तते॥४७॥ अविद्यावृतितादात्म्ये विद्ययैव विनश्यतः॥ विक्षेपस्य स्वरूपं तु
प्रारब्धक्षयमीक्षते॥४८॥ उपादाने विनष्टेपि क्षणं कार्यं प्रतीक्षते॥ इत्याहुस्ता
र्किकास्तद्वदस्माकं किं न संभवेत्॥४९॥

नत्वादित्यत आह। अविद्यावृतीति। अविद्यैककारणयोरावृतितादात्म्ययोर्विद्ययैव
विनिवृत्तिः कर्मस्थेहितोऽविद्याजन्यस्य तु विक्षेपस्वरूपस्य कर्मावसानपर्यंतमवस्था
नमित्यविरोध इति भावः। ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तत्सद्भावमात्रेणोपा
दाने विनष्टेऽपि कथं कार्यानुवृत्तिरित्याशंक्य परशास्त्रांतरसिद्धदृष्टांतेन तदनुवृत्तिंस

ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमभीकृतं न चिरकालमित्याशंक्याह ॥ तंतूनामिति ॥
संसारस्यानादिकालमारभ्यानुवृत्तत्वात्संस्कारवशेन चक्रभ्रमवच्चिरकालानुवृत्तिर्न विरुद्धा
न इति भावः ॥ ननु तार्किकैर्यथाऽयुक्तमपि हि तं तद्वत्तापि सांख्यस्तोक्तौ न तोवेषम्यं दर्शयति ॥

तंतूनां दिनसंख्यानां तैस्तादृक्क्षणईरितः ॥ भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतां
॥५५॥ विनाशोदक्षमं मानं तैस्तथापरिकल्प्यते ॥ श्रुतियुक्त्यनुभूतिभ्यो वदतां किंनु दुःशकं ॥
॥५६॥ आस्तां दुस्तार्किकैः सार्द्धं विवादः प्रकृतं ब्रुवे ॥ स्वोहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ॥५७॥

विनेति ॥ क्षोदक्षमं विचारसहं मानं विना प्रमाणमंतरेणेत्यर्थः ॥ तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ
संपत्स्य इति श्रुतिश्चक्रभ्रमादिदृष्टांतो युक्तिरनुभूतिर्हि द्वंद्वेमवएतेभ्यः प्रमाणेभ्यः किं वक्तुम
शक्यमित्यभिप्रायः ॥ प्रकृतमनुसरति ॥ आस्तामिति ॥ स्वयमहंशब्दार्थयोः कूटस्थपरिणामि
नोरेकत्वं भ्रांत्या सिद्धं ॥५७॥

५७

चि० दी०
॥१३॥
५८

ननु कूटस्थजीवयोरेकत्वं भ्रान्तिसिद्धं चेदिदं भ्रान्तमिति केऽपि कुतो न जानन्ती सांख्ययश्रुतितात्पर्यपर्या-
लोचनश्रमत्वादित्याह॥ अत्राम्यन्त इति॥ श्रुतात्पर्यप्रवक्तारोऽपि केचिदिहं कुतो न जानन्ती सांख्येतेषामा- ५९
कल्येन श्रुतात्पर्यपर्यालोचनाभावादित्याह॥ तत्रापरेति॥ तत्र तावत्प्रत्यक्षैकप्रमाणाभ्युपगमेन

ते

अभ्यंते पंडितंमन्याः सर्वे लौकिकत्वैर्थिकाः॥ अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्ति-
माश्रिताः॥५८॥ पूर्वापरपरामर्शविकलास्तत्र केचन॥ वाक्याभासान्स्व-
स्वपक्षे योजयंत्यल्पलज्जया॥५९॥ कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः॥
लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः॥६०॥

निस्थूलत्वाल्लोकायतादिपक्षं प्रथमतोऽनुभाषते॥ कूटस्थादीति॥ प्रत्यक्षसिद्धत्वे देहा-
दिरात्मत्वं पारमार्थिकं स्यादित्याशंक्योक्तं प्रत्यक्षाभासमिति॥६०॥

॥१३॥

मप

ते प्रसक्षैकप्रमाणवादिनो विवरणमोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरंति। इ
साह। श्रोतीकर्तुमिति। कोशमन्नमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोन्नरसमय इ
ति वाक्यं लक्ष्यते विरोचनस्य सिद्धांतमिति तत्सिद्धांतप्रतिपादकं [illegible] कालेवेदमहं। इत्यादि

श्रोतीकर्तुं स्वपक्षं ते कोशमन्नमयं तथा॥ विरोचनस्य सिद्धांतं प्रमाणं प्रतिजज्ञिरे
॥६१॥ जीवात्मनिर्गमे देहमरणस्यात्र दर्शनात्॥ देहातिरिक्त एवात्मेत्याहुर्लोकायताः
परे॥६२॥

वाक्यं लक्ष्यते एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानंत एव तन्नूपपादयितुं क्षमाः प्रकरणवि
रोधादिति भावः॥६१॥ अस्मिन्मते दोषप्रदर्शनपुरःसरं मतांतरमुत्थापयति। जीवात्मेति॥६२॥

चि० दी०
॥१५॥

कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्याशंक्याह॥ प्रत्यक्षत्वेनेति॥ अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्ताहंबुद्धिगम्यानींद्रियाण्यात्मेत्यर्थः॥६३॥ नन्विंद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतिसिद्धेंद्रियसंवादश्रवणादचेतनत्व

प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणं॥ गमयेदिंद्रियात्मानं वच्मीत्यादिप्रयोगतः॥६३॥ वागादीनामिंद्रियाणां कलहः श्रुतिषु श्रुतः॥ तेन चैतन्यमेतेषामात्मत्वं तत एव हि॥६४॥ हिरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे॥ चक्षुराद्यक्षलोपेपि प्राणसत्वे तु जीवति॥६५॥

मसिद्धमित्याह॥ वागादीति॥ चेतनत्वस्यैवात्मलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह॥ आत्मत्वमिति॥६४॥ मतांतरमुत्थापयति॥ हिरण्यगर्भा इति॥६५॥ छ॥ ॥१५॥

प्राणस्यात्मत्वे श्रौतलिंगानीति दर्शयति। प्राण इति। प्राणा अन्नमय एतस्मिन्पुरे जाग्रतीत्यादिना प्राणा जा
गरणं श्रूयते। न प्राणे प्रपन्न उदतिष्ठत्तदुक्थमभवत्तदेतदुक्थमिति प्राणस्य श्रैष्ठ्यादिकं श्रूयते
अन्योऽन्तर आत्मा प्राणमय इत्यादिना प्राणमयः कोशः प्रपंचितः। आदिशब्देन प्राणसंवाद प्रवे

प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्यादिकं श्रुतं॥ कोशः प्राणमयः सम्यग्विस्तरेण प्रपंचि
तः॥६६॥ मन आत्मेति मन्यंतेऽपासनपरा जनाः॥ प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं म
नसस्ततः॥६७॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः॥ श्रुतो मनोमयः कोशस्ते
नात्मेतीरितं मनः॥६८॥

शादिकं माह॥ ६६॥ प्राणादप्यांतरस्य मनस आत्मत्ववादिनो मतं दर्शयति। मन आत्मेति। प्राणस्याना
त्मत्वे युक्तिमाह। प्राणस्येति॥ ६७॥ मनस आत्मत्वे युक्तिप्रतिपादिकां श्रुतिमाह। मन एवेति। तस्माद्वा
एतस्मात्प्राणमयादन्योऽन्तर आत्मा मनोमय इति श्रुत्यंतरं दर्शयति श्रुत इति। फलितमाह। तेनेति॥६८॥

चि० दी०
॥१५॥

मनसोऽप्यांतरस्य विज्ञानस्यात्मत्ववादिनो बौद्धस्य मतं दर्शयति। विज्ञानमिति। विज्ञानस्यांतरत्वे युक्तिमाह। यत इति॥ ६९॥ विज्ञानं मनःशब्दवाच्यस्यांतःकरणस्यैकत्वात्कथं मनोविज्ञानयोः कार्यकारणभाव इत्याशंक्य तमुपपादयितुं तयोर्भेदं तावद्दर्शयति॥ अहंवृत्तिरिति॥ ७०॥ तयोः कार्यकारणभावमाह॥ अहंप्रत्ययबीजत्वमिति। तदेवोपपादयति। अविदित्वेति। अहंवस्तुदयाभावे इदंवस्त्वनुदयादनयोः कार्यका-

विज्ञानमात्मेति परे आहुः क्षणिकवादिनः॥ यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं॥ ६९॥ अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा॥ विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत्॥ ७०॥ अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटं॥ अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित्॥ ७१॥ क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितौ यतः॥ विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः॥ ७२॥

रणभावः॥ ७१॥ तस्य विज्ञानस्य क्षणिकत्वेऽनुभवं प्रमाणयति॥ क्षणे क्षण इति॥ क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति॥ स्वप्रकाशमिति॥ स्वेनैव प्रमितत्वादित्यर्थः॥ ७२॥ छ॥

॥१५॥

विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह॥ विज्ञानमयेति॥ तस्माद्वा एतस्मात् मनोमयादन्योऽन्त
र आत्मा विज्ञानमयः विज्ञानं यज्ञं तनुते इत्यादिवाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः॥७३॥
बौद्धावांतरभेदस्य मन्यवादिनो मतं दर्शयति॥ विज्ञानमिति॥ ७४॥ तत्र श्रुतिमाह॥ असदे

विज्ञानमय कोशोयं जीव इत्यागमा जगुः॥ सर्वः संसार एतस्य जन्मनाशसुखादिकः॥
७३॥ विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत्॥ अन्यस्यानुपलब्धत्वाच्छून्यं माध्य
मिका जगुः॥७४॥ असदेवेदमित्यादाविदमेव श्रुतं ततः॥ ज्ञानज्ञेयात्मकं सर्वं
जगद्भ्रांतिप्रकल्पितं॥७५॥

वेदमिति॥ अन्यस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह॥ ज्ञानेति॥ ७५॥

द्वि०टी०
॥१६॥

धिष्ठान२

तदेतन्मतं दूषयति॥ निरधिष्ठानेति॥ निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्कल्पनास्पदस्यात्मनः सत्ताभ्युपगंतव्या॥ किंच शून्य वादिनापि शून्यसाक्षित्वेनावश्यमात्माभ्युपगंतव्यः॥ अन्यथा तस्यानभ्युपगमे शून्यस्योक्तिः शून्यमिति अभिधानं ते बौद्धस्य

निरधिष्ठानविभ्रांतेरवभासनोऽस्तिता॥ शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते॥७६॥ अन्योऽविज्ञानमयत आनंदमय आंतरः॥ अस्तीत्येवोपलब्धव्य इति वैदिकदर्शने॥७७॥ अणुर्महान्मध्यमो वेत्येवं तत्रापि वादिनः॥ बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात्॥७८॥

तव मते न सिद्ध्येदिति भावः॥७६॥ कस्तर्हि मत सत्य आत्मा॥ अन्य इति॥ तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमयः अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनेति च श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शने वैदिकसिद्धांतः॥७७॥ एवमात्मस्वरूपे विप्रपत्तिं प्रद

॥१६॥

अत्राणुत्वादिनस्त्वावदर्शयति। अणुमिति। अणुत्वाभिधाने हेतुमाह। सूक्ष्मेति। तदुपपादयति। रोम्ण इति। नाडीष्विति शेषः। सूक्ष्मासु नाडीषु संचारोऽणुत्वमंतरेण न घटत इत्यभिप्रायः॥७९॥ अणुत्वे किं प्रमाणमत आह। अणोरिति। अणोरणीयान्महतो महीयानेषोऽणुरात्मा चेतसा वेदितव्यः॥ सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादिश्रुतय इत्यर्थः॥८०॥ श्रुत्यंतरमुदाहरति। बालाग्रेति॥८१॥ मध्यमपरिमाणवादिनोद

अणुं वदंत्यांतराला: सूक्ष्मा नाडीप्रचारत:॥ रोम्ण: सहस्रभागेन तुल्यासु प्रचरत्ययं॥७९॥ अणोरणीयानेषोऽणु: सूक्ष्मात्सूक्ष्मतरं त्विति॥ अणुत्वमाहु: श्रुतय: शतशोऽथ सहस्रश:॥८०॥ बालाग्रशतभागस्य शतधा कल्पितस्य च॥ भागो जीव: स विज्ञेय इति चाहापरा श्रुति:॥८१॥ दिगंबरा मध्यमत्वमाहुरापादमस्तकं॥ चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि॥८२॥ सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत्॥ स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोक्षवत्॥८३॥

र्शयति॥ दिगंबरा इति॥ तत्रोपपत्तिमाह॥ आपादेति॥ स एष इह प्रविष्ट आ नखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह॥ आनखाग्रेति॥८२॥ ननु मध्यमपरिमाणत्वे श्रुतिसिद्धो नाडीप्रचारो न घटत इत्याशंक्य। सूक्ष्मनाडीति॥ यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशस्तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारेणात्मनोऽपि प्रचार उपचर्यत इत्यर्थः॥८३॥

नन्वात्मनो नियतमध्यमपरिमाणत्वेऽकर्मवशान्न्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्यावयवागमापा
याभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवद्दुर्वचं न विरुध्यत इत्याह॥ न्यूनाधिकेति॥ फलितमाह॥ ते
नेति॥८४॥ आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेनेन दूषयति॥ सांशस्येति॥ भवतु को दोषस्तत्रा

न्यूनाधिकशरीरेषु प्रवेशोऽपि न सम्भवेत्॥ आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं॥८४॥
सांशस्य घटवन्नाशोऽप्यवश्यं तथा सति॥ कृतनाशाकृताभ्यागमयोः को वारको भवेत्॥८५॥
तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः॥ आकाशवत्सर्वगतो निरंशः श्रुतिसंमतः॥८६॥

ह॥ तथा सतीति॥ कृतयोः पुण्यपापयोर्भोगमंतरेण नाशः अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः॥
एतद्दोषद्वयमात्मनोऽनित्यत्वाभ्युपगमे भवेदिति भावः॥८५॥ अतः परिशेष्यादात्मनो विभुत्वं सिद्धमि
त्याह॥ तस्मादिति॥ तत्र प्रमाणमाह॥ आकाशवदिति॥ आकाशवत्सर्वगतश्च नित्यः॥ निष्कलं निष्क्रि
यमित्याद्यागमः प्रमाणमित्यर्थः॥८६॥

एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति॥ इन्द्रकेति॥४८॥ अ
चिद्रूपत्ववादिनो दर्शयति॥ प्राभाकरा इति॥ तत्प्रक्रियामनुभावयति॥ आकाशवद्रूपमिति॥ आत्मा ह
य्यं विभुत्वे महत्त्वे गुणवत्त्वादाकाशवदित्यनुमानं सूचितं। आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशे
षगुणं दर्शयति॥ शब्दवदिति॥ आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात् यत्पृथिव्यादिभ्यो न भिद्यते

इन्द्रका तद्विशेषे तु बहुधा कल्पितं यथा॥ अचिद्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि॥४८॥ प्राभा
करास्तार्किकाश्च प्राहुरस्याचिदात्मतां॥ आकाशवदयमात्मा शब्दवज्ज्ञगुणोऽश्चितिः॥४८॥
इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे॥ तत्संस्काराश्च तस्यैते गुणाश्चितिवदीरिताः॥४९॥
आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः॥ जायन्तेऽथ प्रलीयन्ते सुषुप्तेऽदृष्टसंक्षयात्॥५०॥ ६॥

त

तज्ज्ञानगुणकमपि न भवति यथा पृथिव्यादिरित्यनुमानं द्रष्टव्यं॥४८॥ तस्यैव विशेषगुणान्तराण्याह॥
इच्छेति॥ तत्संस्काराः भावनाः॥४९॥ एषां गुणानामुत्पत्तिविनाशप्रकारमाह॥ आत्मन इति॥ स्वा
दृष्टवशतः आत्मनो मनसा योग इत्यन्वयः॥५०॥

35

चि०दी०

॥११९८॥

आत्मनोऽचिद्रूपत्वे कथं चेतनत्वाभ्युपगम इत्याशंक्य चितिमत्त्वादित्याह॥ चितिमत्त्वादिति॥ आत्म-
नश्चेतनत्वे हेत्वन्तरमाह॥ इच्छेति॥ तस्येश्वराद्वैलक्षण्यमाह॥ स्यादिति॥१॥ न चात्मनो विभुत्वे लो-
कान्तरगमनादिकं कथं घटते इत्याशंक्यास्मिन्देहे कर्मवशादिच्छाद्युत्पत्तौ सत्यामत्रात्मनोऽवस्थानादि
व्यवहार इव कर्मवशाल्लोकान्तरे देहान्तरोत्पत्तौ तदवच्छिन्नात्मप्रदेशे सुखदुःखे जिव शानत्रात्म-

चितिमत्त्वाच्चेतनोऽयमिच्छाद्वेषप्रयत्नवान्॥ स्याद्धर्माधर्मयोः कर्ता भोक्ता दुखादिमत्तनः॥१॥
यथात्र कर्मवशतः कादाचित्कं सुखादिकं॥ तथा लोकान्तरे देहे कर्मणेच्छादि जन्यतां॥२॥
एवं सर्वगतस्यापि संभवेतां गमागमौ॥ कर्मकाण्डः समग्रोत्र प्रमाणमिति ते वदन्॥३॥

नो गमनादिव्यवहार इत्यौपचारिकमात्मनो गमनादिकमित्यभिप्रेत्याह॥ यथात्र कर्मवशत इति॥२॥
आत्मनः कर्तृत्वादिधर्मवत्त्वे किं प्रमाणमित्यत आह॥ कर्मकांड इति॥३॥

॥११९८॥

न च श्रोविज्ञानमयत आनंदमयश्चांतर इत्यानंदमयस्यात्मत्वमुक्तमिदानीं इत्यादिना नन्वः प्रतिपाद्यते
तः सर्वोत्तरत्वविरोध इत्याशंक्याह॥ आनंदमयेति॥ सुषुप्तावस्पष्टचिद्य आनंदमयकोशः परिदृश्यते स
सर्वकोशः श्रोतेषु पंचकोशेषु प्रथम एषां प्राभाकरादीनां मामा अस्यात्मनः सर्वकोशानां ज्ञानादयो गुणाद
इत्यर्थः॥१४॥ अस्यात्मनश्चिदचित्त्वं माहावर्णयंति इत्याह॥ गूढमिति॥ भाट्टा आत्मनो गूढत्वमस्य च

आनंदमयकोशोयः सुषुप्तौ परिदृश्यते॥ अस्पष्टचित्स आत्मैषां सर्वकोशस्य तेगुणाः॥१४॥
गूढं चैतन्यमुत्प्रेक्ष्य द्रव्यबोधस्वरूपतां॥ आत्मनो ब्रुवते भाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः॥१५॥
जडोभूत्वा तदास्वाप्समिति जाड्यस्मृतिस्तदा॥ विना जाड्यानुभूतिं न कथंचिदुपपद्यते॥१६॥

तन्यमुत्प्रेक्ष्य कुहित्वाच्चिज्जडोभयात्मकतां वर्णयंति॥ चैतन्योत्प्रेक्षायां कारणमाह॥ चिदुत्प्रेक्षेति॥ उत्थितस्मृते
श्चिदुत्प्रेक्षा भवतीति योजना॥ सुप्तोत्थितस्य जायमानात्मस्मरणात्सुषुप्ते चैतन्यस्योत्प्रेक्षा भवतीत्यर्थः॥१५॥
चिदुत्प्रेक्षाप्रकारमेव स्पष्टयति॥ जडोभूत्वेति॥ तदा सुषुप्तिकाले जडो भूत्वोऽस्वाप्समिति एवंरूपा जाड्यस्मृतिरु
त्थितस्य पुरुषस्य जायमाना सुषुप्तिकालीनजाड्यानुभवमंतरेणानुपपद्यमाना तदानींतनजाड्यानुभवं
कल्पयतीति भावः॥१६॥

सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह। द्रष्टुरिति॥ न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुतौ
सुषुप्तौ चैतन्यलोपाभावः। श्रुतेरतोऽपि कारणादयमात्मा खद्योतवत् स्फुरणास्फुरणाभ्यां युक्तो न भव
तीत्यर्थः॥१७॥ अस्मिन्नात्मनि दृष्टान्तमभिधाय पुनः संसारं स्वप्नवन्मृषा प्रथयति॥ निरंशस्येति॥१८॥ अ
जाड्यस्य तर्हि का गतिरित्यत आह। जाड्यांश इति॥ तस्य प्रकृतिरूपं सत्त्वरजस्तमोगुणात्मकं॥ प्रकृतिरूपस्य जाड्यांशस्य प्र

द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुप्तौ ततः स्वयं॥ अप्रकाशप्रकाशाभ्यामात्मा खद्योतवन्न तु॥१७॥ निरंशस्यात्म
नोंऽशत्वं न कथंचिद्घटिष्यते॥ तेन स्वरूपमेवात्मेत्याहुः सांख्यविवेकिनः॥१८॥ जाड्यांशः प्रकृते रूपं
विकारि त्रिगुणं च तत्॥ चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्तते॥१९॥ असंगायाश्चितेर्बंधमो
क्षौ भेदाग्रहात्मतौ॥ बंधमुक्तिव्यवस्थार्थं पूर्वेषामिव चिद्भिदा॥१००॥

योजनमाह। चितेरिति॥ चितः पुरुषस्य इत्यन्वयः॥१९॥ ननु चितोऽसंगत्वेन प्रकृतिपुरुषयोरसंगत्वे विविक्त
त्वात् प्रकृतिप्रवृत्तिः कथं भोगापवर्गाविति शंक्य तयोर्विवेकस्याग्रहणात् पुरुषे भोगापवर्गौ व्यवह्रियेते इत्याह
असंगाया इति॥ तार्किकादिरिव सांख्यैरात्मभेदोऽङ्गी क्रियत इत्याह। बंधमुक्तीति॥१००॥ ७॥

२ प्रतिपादिकां

प्रकृतिसद्भावे पुरुषस्यासंगत्वे च श्रुतिमुदाहरति॥ महत इति॥१०१॥ एवं जीवविषयां वादिविप्रतिपत्तिं प्रदर्श्येश्वरविषयां तां प्रदर्शयितुं ईश्वरस्वरूपं तावत् स्थापयति॥ चित्संनिधाविति॥ ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पने मप्रमाणमिति सांख्याः॥ स जीवेभ्य इति॥१०२॥ तामेवेश्वरसद्भावे श्रुतिं पठति॥ प्रधानेति॥ प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञा जीवास्तेषां पतिः गुणाः सत्त्वादयः तेषामीशो नियामक इत्यर्थः॥ न केवलं

महतः परमव्यक्तमिति प्रकृतिरुच्यते॥ श्रुता वसंगता न हृदसंगो ह्ययतः स्फुटा॥१०१॥ चित्संनिधौ प्रवृत्तायाः प्रकृतेर्हि नियामकः॥ ईश्वरं ब्रुवते योगाः स जीवेभ्यः परिश्रुतः॥१०२॥ प्रधानक्षेत्रज्ञपतिर्गुणेश इति हि श्रुतिः॥ आरण्यके संभ्रमेणान्तर्याम्युपपादितः॥३॥ अत्रापि कलहायन्ते वादिनः स्वस्वयुक्तिभिः॥ वास्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि॥४॥

वलमियमेव श्रुतिरीश्वरप्रतिपादिकान्तर्यामिब्राह्मणमपीत्याह॥ आरण्यक इति॥३॥ तामेव वादिविप्रतिपत्तिं प्रतिजानीते॥ अत्रापीति॥ प्रणाम नतिक्रम्य यथाप्रज्ञं॥४॥ श्रीगोवर्द्धनधारिणे नमोऽस्तु॥

अर्थ॥

इदानीं पतंजलिनोक्तमीश्वरप्रतिपादकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येत
त्सूत्रं तत्परतीत्याह क्लेशेति॥ क्लेशा अविद्यादयः। कर्माणि कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामि
ति सूत्रितानि। सति मूले तद्विपाको जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषास्तदाशयास्तेषां

क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः। पुंविशेषो भवेदीशो जीववत्सोऽप्यसंगचित्।
॥५॥ तथापि पुंविशेषत्वात् घटतेऽस्य नियंतृता। अव्यवस्थौ बंधमोक्षावापतेतामिहान्य
था॥६॥

संस्काराशयैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवति। सोऽपि जीववदसंगश्चिद्रूपश्चेत्स
र्वः॥५॥ ननु असंगचिद्रूपत्वे कथं नियंतृत्वमित्यत आह॥ तथापीति॥ ईश्वरस्य नियंतृत्वानभ्यु
पगमे दोषमाह॥ अव्यवस्थाविति॥६॥ श्रीबलिनिग्रहार्थं वामनरूपधरायहरभायनमोस्तु॥

असंगस्येश्वरस्य नियंतृत्वं निष्प्रमाणमित्याशंक्याह ॥ जीवेति ॥ तन्नियंतृत्वं श्रुतं । ननु श्रुतम
प्ययुक्तं कथमसंगी नियंतेत्यत आह ॥ युक्तमपीति ॥ जीवधर्मस्य क्लेशादेरभावादुपपन्नेत्येवार्थः ॥७॥
ननु जीवा अप्यसंगाश्चित्स्वरूपाः क्लेशादिरहिता एव तथा चेश्वरे को विशेष इत्याशंक्य जीवा
नां स्वतः क्लेशादिरहितत्वेऽपि बुद्ध्या सह विवेकाग्रहात्क्लेशादिरस्तीति परवौ कस्मारयति जी

जीवस्मादिष्वेवमादाव संगस्य महात्मनः ॥ युक्तं तद्युक्तमथ स्यात्क्लेशकर्माद्यसंभवात् ॥७॥
जीवानामप्यसंगत्वात्क्लेशादिर्नह्यथापि चेत् ॥ विवेकाग्रहतः क्लेशकर्मप्रागुदीरितौ ॥८॥
नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते ॥ असंगस्य नियंतृत्वमयुक्तमिति तार्किकाः ॥९॥
पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा ॥ सत्यकामः सत्यसंकल्प इत्यादिश्रुतिगर्जनात् ॥१०॥

वानामिति ॥८॥ तार्किकास्त्वसंगस्य नियामकत्वमसहमाना जीवविलक्षणतया ज्ञानादिगुणत्र
यं नित्यमंगीकुर्वंत इत्याह ॥ नित्यज्ञानेति ॥९॥ ननु ज्ञानादिगुणकस्य तस्य कथं जीवाद्वैलक्षण्य
मित्याशंक्य गुणानां नित्यत्वादेवेति परिहरति ॥ पुंविशेषत्वमिति ॥ गुणानां नित्यत्वे प्रमा
णमाह ॥ सत्येति ॥१०॥

41

तत्रापि दोषसद्भावात्सक्षात्तरमाह॥ मिथ्येति॥ तस्य हिरण्यगर्भस्य किं रूपमत आह॥ लिंगदेहेनेति॥ मायोपाधिकः परमात्मा लिंगशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यत इत्यर्थः॥ १३॥ हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह॥ उक्तो वेति॥ ननु लिंगशरीरयोगे जीवः स्यादित्याशंक्याविद्याकामकर्माभावान्न जीव इत्याह॥ लिंगसत्त्वेपीति॥ १४॥ केवललिंगशरीरस्य स्थूलश

उक्तोपवशालणे तस्य महात्म्यमतिविस्तृतं॥ लिंगसत्त्वेपि जीवत्वं नास्य कर्माद्यभावतः॥ १२॥
स्थूलदेहं विना लिंगदेहो न क्वापि दृश्यते॥ वैराजो देह ईशोतः सर्वमस्तकादिमान्॥ १३॥ तोर
सहस्रशीर्षेत्येवं विश्वतश्चक्षुरित्यपि॥ श्रुतमित्याह रनिशं विश्वरूपस्य चिंतकाः॥ १४॥

स्थूलशरीरं विहायानुपलभ्यमानत्वात् स्थूलशरीरसमष्ट्यभिमानी विराडीश्वर इत्याह॥ स्थूलदेहं विनेति॥ १५॥ तत्सद्भावे प्रमाणमाह॥ सहस्रशीर्षेति॥ श्रुतवाक्यमिति शेषः॥ १६॥
श्रीमत्कृष्णवासुदेव रामराम जयराम जयजय राम सच्चिदानंद परब्रह्म मूर्त्तये नमः॥ ६

विश्वरूपस्य चिंतकाः विराडुपासकाः अत्रापि दोषदृष्ट्या देवतांतरमालंबनमाह सोहा ॥ सर्वतःशि ॥
रःश्रवं कैरुच्यत इत्यत आह ॥ पुत्रार्थमिति ॥ १६ ॥ प्रजापतिः प्रजा असृजत सादिक्षु प्रमाणमित्या
कुरिसाह ॥ प्रजापतिरिति ॥ १७ ॥ भागवतमाह ॥ विष्णोरिति ॥ शैवानांमतमाह ॥ शिवस्येति ॥ १८ ॥ गा

सर्वतः पाणिपादश्चेत्किम्यादेरपि चेशता ॥ तत्रश्च तुर्मुखो देहः एवेशो नेतरः पुमान् ॥ १५ ॥
पुत्रार्थं तु मुपासीना एवमाहुः प्रजापतिः ॥ प्रजा असृजत सा दिक्षु तीक्ष्णो दाहरंसमीः ॥ १६ ॥ वि
ष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः ॥ विष्णुरेवेश इत्याहुर्लोके भागवतागनाः ॥ १७ ॥ शि
वस्य पादावन्विष्टुं शाङ्ख्य शक्तस्ततः शिवः ॥ ईशो न विष्णुरित्याहुः शैवा आगममानिनः ॥ १८ ॥ पुर
त्रयं सादयित्तुं विघ्नेशं सोप्यपूजयत् ॥ एविनायक पाहुरीशं गाणपससमन्नेरताः ॥ १९ ॥ ४ छ ॥

णपसमतमाह ॥ पुरत्रयमिति ॥ १९ ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥ एवमिति ॥ अन्ये भैरवा
भैरवाद्युपासकाः ॥ अन्यथान्यथा वर्णने कारणमाह ॥ स्वस्वेति ॥ तत्र तत्र प्रमाणानि संतीति दर्शी
एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा ॥ मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपेदि यति ॥ मंत्रेति ॥

पं क्षा २ ॥ २० ॥

श्वे० दी०
१२४ ॥

एवं कृतिमतानीत्याशंक्यासंख्यानीत्याह ॥ अंतर्यामिणमिति ॥ स्थावरे शवादौ न कापि दृष्ट इत्याशंक्याह ॥ अथवा एकेति ॥ २१ ॥ नन्वेवं मतभेदे कस्योपादेयत्वं कस्य वा हेयत्वमित्याकांक्षायामाह ॥ तत्त्वनिश्चयेति ॥ तत्त्वनिश्चयकामेन तत्त्वनिश्चयेच्छया न्यायागमयोर्विचारणशीलानां पुरुषाणां प्रतिपत्तिरेकैव स्यात् ॥ सा कीदृशीत्यत आह ॥ सा यत्रेति ॥ २२ ॥ तामेव प्रतिपत्तिं द

॥ २९ ॥

अंतर्यामिणमात्मस्थं स्थावरांतेशवादिनः ॥ संसत्स्वशार्कवंशादेः कुलदेवत्वदर्शिनाः ॥ २१ ॥ तत्त्वनिश्चयकामेन न्यायागमविचारिणां ॥ एकैव प्रतिपत्तिः स्यात्सा यत्र स्फुटमुच्यते ॥ २२ ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥ अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ २३ ॥

॥२१॥

र्शयितुं तदनुकूलां श्रुतिं पठति ॥ मायां त्विति ॥ मायामेव प्रकृतिं जगदुपादानं कारणं विद्याज्जानीयात् ॥ मायिनं तु मायोपाधिकमंतर्यामिणं एव महेश्वरं मायाधिष्ठातारं निमित्तकारणं जानीयात् ॥ अस्य मायिनो महेश्वरस्यावयवभूतैरंशरूपैरीश्वराचराणैः जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रु

त्न श्रुत्यनुसारेणेश्वरविषयो निर्णयो युक्त इत्याह ॥ इतीति ॥ कुतो युक्त इत्याशंक्य सर्वत्रावि
रुद्धत्वादित्याह ॥ तथेति ॥ सर्वव्यापीश्वर इत्यभ्युपगमान्नकेनापि विरोध इति भावः ॥२४॥
ननु जगत्सृष्टिकर्तृतया मायायाः किंरूपमित्यत आह ॥ माया चेयमिति ॥ कुत इत्यत आह ॥
तापनीय इति ॥ माया च तमोरूपेति तापनीयोपनिषदि तमोरूपत्वस्याभिधानोदित्यर्थः ॥

ईश्वरे श्रुत्यनुसारेण न्यायो निर्णय ईश्वरे ॥ तथा सति विरोधः स्यात् स्वभावत्वांतेशवादिनां
॥२४॥ माया चेयं तमोरूपा तापनीये तदीरणात् ॥ अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्व
यं ॥२५॥ जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः ॥ आबालगोपं स्पष्टत्वादानंत्यं तस्य
साब्रवीत् ॥२६॥

मायायास्तमोरूपत्वे किं प्रमाणमित्याकांक्षायामनुभूतेरिति श्रुतिरेवात्रानुभवः प्रमाण
मिति प्रतिजानीत इत्याह ॥ अनुभूतिमिति ॥२५॥ तत्र मायायास्तमोरूपत्वे कोसावनुभ
व इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवात्रानुभवं स्पष्टीकरोतीत्याह ॥ जड
मिति ॥ अनंतमिति श्रुत्यासर्वानुभवसिद्धत्वमुच्यत इत्याह ॥ आबालेति ॥२६॥

45

चि०दी०
॥२३॥

जडशब्दस्यार्थमाह॥ अचिदात्मेति॥ मोहशब्दार्थमाह॥ यत्रेति॥२७॥ इत्थं प्रकारेण सर्वानुभ
वसिद्धत्वलक्षणमानं संसिद्धमित्याह॥ इत्थमिति॥ एतज्जाड्यमोहलक्षणात्मरूपत्वान्नैवं
मायायाः सर्वानुभवसिद्धत्वे घटादिवत्सत्त्वेनानिर्वचनीयत्वं स्यादित्याशंक्याह॥ युक्तीति॥ तुर
दःशंकाया रसार्थः॥ अनिर्वाच्यं सत्त्वेनासत्त्वेन सदसत्त्वेन वा निर्वक्तुमशक्यं तत्र किं प्रमाणमि

अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत्॥ यत्र कुंठीभवेद्बुद्धिः स मोह इति लौकिकाः॥
२७॥ इत्थं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते॥ युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासदिति श्रु
तेः॥२८॥ नासदासीद्विभातत्वान्नो सदासीच्च बाधनात्॥ विद्यादृष्ट्या श्रुतं तुच्छं त
स्य नित्यनिवृत्तितः॥२९॥

श्रुत आह॥ नासदिति॥२८॥ अस्याः श्रुतेरभिप्रायमाह॥ नासदिति॥ बाधनान्नेह नानास्ति
किंचनेति श्रुत्या निषेधादित्यर्थः॥ सदसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति श्रुत्योपेक्षितं॥ एवं
युक्तिदृष्ट्यानिर्वचनीयत्वं प्रदर्श्य तुच्छमित्यरूपमस्येति श्रुतिविद्वदनुभवेन तस्यास्तुच्छत्वं

॥२३॥

उपपादितमर्थमुपसंहरति॥ तुच्छेति॥ श्रौतबोधेन तुच्छा कालत्रयेप्यसत्त्वी यौक्तिकबोधेना
निर्वचनीया लौकिकबोधेन वास्तवी चेत्येवं त्रिधा माया ज्ञेयेत्यर्थः॥२०॥ अस्य सत्त्वमसत्त्वं च
दर्शयन्नीतिश्रुतेरर्थमस्याः कथमाह॥ अस्येति॥ एकस्या एव मायायाः जगत्सत्त्वासत्त्वप्रद
र्शकत्वे दृष्टांतमाह॥ प्रसारणादिति॥२१॥ स्वतंत्रास्वतंत्रेति श्रुत्या मायायाः स्वातंत्र्यास्वा

तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा॥ ज्ञेया माया त्रिभि[illegible] श्रौतयौक्तिकलौ
किकैः॥२०॥ अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ॥ प्रसारणाच्च संकोचाद्यथा चि
त्रपटस्तथा॥२१॥ अस्वतंत्रा हि माया स्यादप्रतीतेर्विना चितिं॥ स्वतंत्रापि तथै
वस्यादसंगस्यान्यथाकृतेः॥२२॥

पं दे १

तंत्र्ये दर्शिते॥ तत्रोभयत्रोपपत्तिमाह॥ अस्वतंत्रेति॥ स्वभासकत्वे चैतन्यं विहाय
नप्रकाशनरूपस्य स्वतंत्राऽसंगस्यात्मनोऽन्यथाकरणात्स्वतंत्रापीत्यर्थः॥२२॥ छ १८

अन्यथाकरणमेव स्पष्टयति॥ कूटस्थासंगमिति॥ जीवेशावाभासेन करोतीति श्रुत्युक्तं जीवेश्वरविभागं च करोतीत्याह॥ चिदाभासेति॥२३३॥ ननु आसंगस्यान्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह॥ कूटस्थमिति॥ ननु कूटस्थस्याविघातेन जगदादिस्वरूपसंपादनमि

कूटस्थासंगमात्मानं जगत्त्वेन करोति सा॥ चिदाभासस्वरूपेण जीवेशावपि निर्ममे॥२३३॥ कूटस्थमनुपद्रुत्य करोति जगदादिकं॥ दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः॥२३४॥ द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि॥ मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः॥२३५॥

त्याशंक्य मायाया दुर्घटैकविधायित्वान्नेदमाश्चर्यकारणमित्याह॥ दुर्घटेति॥ अन्यथा मायात्वमेव भज्येतेति भावः॥२३४॥ मायायाः दुर्घटकारित्वं स्वभाव एवेति दृष्टान्तेनाह॥ द्रवत्वमिति॥ उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायाया दुर्घटकारित्वमित्यर्थः॥२३५॥

ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायायामाश्चर्यमन्यत्र हेतुत्वदर्शनादित्याशंक्य मायाप्रयोक्तुः साक्षात्कर्तुंत्वमेवास्या आश्चर्यकारणत्वेनोपदिष्ट दिसाह ॥ न वेत्तीति ॥ २६ ॥ किंच जगत्सत्यत्ववादिनो न्यायिकादीन्प्रत्येवं विधानं चोद्यानि कर्तव्यानि न मायावादिनं प्रतीत्याह ॥ प्रत्युत्तरं नास्तीति ॥ २७ ॥ मायावादिनं प्रति चोद्यकर्तुः कोऽतिप्र

न वेत्ति लोको यावत्तं साक्षात्तावच्चमत्कृतिं ॥ धत्ते मनसि पश्चात्तु मायैवेत्युपशाम्यति ॥ २६ ॥ प्र

सरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ॥ न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥ २७ ॥ चोद्ये

पि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया ॥ परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ॥ २८ ॥ विस्मये

कशरीरा या मायायाश्चोद्यरूपता ॥ अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥ २९ ॥ मा

यात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु ॥ लोकप्रसिद्धमायाया लक्षणं यत्तदीक्ष्यतां ॥ ३० ॥

संगमाह ॥ चोद्येपीति ॥ तर्हि किं कर्तव्यमित्यत आह ॥ परिहार्यमिति ॥ २८ ॥ उक्तमेवार्थं प्रपंचय

ति ॥ विस्मयेति ॥ २९ ॥ मायात्वनिश्चये तत्परिहारान्वेषणमुचितं स एव नेदानीं सिद्ध इति न शं

कते ॥ मायात्वमिति ॥ मायालक्षणस्य ज्ञाने मायात्वं निश्चीयतामित्यभिप्रायेणाह ॥ तर्हीति ॥

चि०टी०

॥२५॥

तस्या अपि किं लक्षणमित्यत आह। नेति॥४१॥ द्वयं नेति सिद्धं लक्षणं दर्शयति केयोजयति। स्वस्य स्थिति॥४२॥ जगतोऽस्य निरूपणात्तं कथमित्याशंक्य तद्दर्शयति। निरूपयितुमिति॥४३॥ अस्य निरूपणासंभवोदाहरणेन स्पष्टयति। देहेंद्रियेति॥४४॥ स्वभाववादी शंकते। वीर्यस्येति।

न निरूपयितुं शक्या विस्पष्टं भासते च या। सा मायेतींद्रजालादौ लोकाः संप्रतिपेदिरे॥४५॥ स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणं। मायामयं जगत्तस्मादीक्षस्वापक्षपाततः॥४६॥ निरूपयितुमारब्धे निखिलैरपि पंडितैः। अज्ञानं पुरतस्तेषां भाति कक्षासु कासु चित्॥४७॥ देहेंद्रियादयो भावा वीर्येणोत्पादिताः कथं। कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरं॥४८॥ वीर्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्वया। अन्वयव्यतिरेकौ यौ भग्नौ तौ वंध्यवीर्यतः॥४९॥ न जानामि किमप्येतदित्यंते शरणं तव। अत एव महांतोऽस्य प्रवदंतींद्रजालतां॥५०॥

सिद्धांती पृच्छति। कथं तदिति। अन्वयव्यतिरेकाभ्यां जानामीत्याशंक्य व्याप्यभावान्नेवमित्याह। अन्वयेति॥४९॥ एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति तिपत्तिरत्र तमोह।
न जानामीति॥५०॥

॥२५॥

उक्तानिर्वचनीयत्वे दृढसंमतिं दर्शयति ॥ एतस्मादिति ॥ ४७ ॥ न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किंतु
वटवृक्षादेरपीत्याह ॥ देहवदिति ॥ ४८ ॥ नन्वस्माभिर्निर्वक्तुमशक्यत्वेपि उदयनादिभिराचार्यै
निरुच्यत इत्यसारांशंक्याह ॥ निरुक्ताविभिमानमिति ॥ ४९ ॥ उक्तार्थे सांप्रदायिकानां वाक्यं संवादयति ॥

एतस्मात्किमिवेंद्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानांकुरं
॥ पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छ
ति ॥ ४७ ॥ देहवद्वटधानादौ सुविचार्य विलोक्यतां ॥ क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चि
नु ॥ ४८ ॥ निरुक्तावभिमानं ये दधते तार्किकादयः ॥ हर्षमिश्रादिभिस्ते तु खंडनादौ
सुशिक्षिताः ॥ ४९ ॥ अचिंत्याः खलु ये भावा न तांस्तर्केण योजयेत् ॥ अचिंत्यरचनारूपं
मनसापि जगत्खलु ॥ ५० ॥ अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु ॥ मायाबीजं तदे
वैकं सुषुप्तावनुभूयते ॥ ५१ ॥

अचिंत्या इति ॥ ५० ॥ भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायां किमायातमित्यत आह ॥ अचिंत्यरच
नेति ॥ अचिंत्यरचनाशक्तिमद्बीजं कारणं सैव मायेत्यर्थः ॥ नन्वेवंविधं कारणं क्व दृष्टमित्यत

चि॰ दी॰
॥२६॥

कथं तस्या जगद्बीजत्वमित्यत आह ॥ जाग्रदिति ॥ ततः किमित्यत आह ॥ तस्मादिति ॥ यतो जगत्कारणं
मायाऽतोऽशेषजगद्वासनास्तत्र मायायां तिष्ठन्तीत्यर्थः ॥५२॥ ततोऽपि किं तत्राह ॥ या बुद्धिवासना
इति ॥ ननु तासु प्रतिबिंबोऽस्ति चेत्कुतो नानुभूयत इत्याशंक्यास्पष्टत्वादित्याह ॥ मेघेति ॥ तर्हि कु
तस्तत्सिद्धिरित्यत आह ॥ अनुमीयतामिति ॥५३॥ ननु मेघाकाशोदकस्यास्पष्टाकाशप्रतिबिंबत्वे व
पि तज्ज्ञानोपयोग्यस्य घटोदकस्य स्पष्टाकाशप्रतिबिंबवतः सद्भावान्मेघाकाशानुमानं घटते इह तथो

जाग्रत्स्वप्नजगत्तत्र लीनं बीजइवद्रुमः ॥ तस्मादशेषजगतो वासनास्तत्र संस्थिताः ॥५२॥ या बुद्धि
वासनास्तासु चैतन्यं प्रतिबिंबितं ॥ मेघाकाशवदस्पष्टचिदाभासोऽनुमीयतां ॥५३॥ साभास
मेव तद्बीजं धीरूपेण प्ररोहति ॥ अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते ॥५४॥

विषदृष्टांताभावात्कथमनुमानोदय इत्याशंक्याचापि तथाविधदृष्टांतसंपादनायाह ॥ साभास
मिति ॥ चिदाभासविशिष्टं तदेवाज्ञानं बुद्धिरूपेण परिणममानं विस्पष्टचिदाभासवद्भव
तीतिभावः ॥ एवं चेदनुमानमत्रस्तूचितं भवति ॥ विमताः बुद्धिवासनाश्चित्प्रतिबिंबवत्यो
भवितुमर्हंति बुद्ध्यवस्थाविशेषत्वात् बुद्धिवृत्तिवदिति ॥५४॥

एवं जीवेश्वरयोर्मायिकत्वं श्रुत्युक्तमुपपादितमुपसंहरति॥ मायाभासेनेति॥ ननु जीवेश्वरयोर्मायि
कत्वे समाने कथमवांतरभेदसिद्धिरित्याशंक्यास्पष्टस्पष्टोपाधिमत्त्वेन मेघाकाशजलाकाशयो
रिव तत्सिद्धिरित्याह॥ मेघाकाशेति॥५५॥ ईशस्य मेघाकाशसाम्यं स्फुटीकरोति॥ मेघवदिति॥

मायाभासेन जीवेशौ करोतीति श्रुतौ श्रुतं॥ मेघाकाशजलाकाशाविव तौ सुव्यव
स्थितौ॥५५॥ मेघवद्वर्तते माया मेघस्थिततुषारवत्॥ धीवासनाश्चिदाभास
स्तुषारस्थखवत्स्थितः॥५६॥ मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः॥
अंतर्यामी च सर्वज्ञो जगद्योनिः स एव हि॥५७॥

५६॥ मायाप्रतिबिंबस्येश्वरत्वे किं प्रमाणमित्याशंक्य श्रुतिरेवेत्याह॥ मायाधीन इति॥ न
केवलमीश्वरत्वमस्य श्रुतमपि त्वंतर्यामित्वादिकमपि धर्मजातं श्रुतमस्तीत्याह॥ अं
तर्यामीति॥५७॥

चि० दी०
॥२८॥

ननु धीवासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति ॥
सोऽयुप्त इति ॥ सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवेत्यादिका श्रुतिर्धीवासनाप्रतिबिंबरूपस्यानं
दमयस्येश्वरत्वादिकं प्रतिपादयतीत्यर्थः ॥५८॥ नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमि
त्याशंक्याह ॥ सर्वज्ञत्वादिक इति ॥ कुतस्तत्राह ॥ क्षोभेति ॥ इतोपि न विप्रतिपत्तिः कार्येत्या

सोषुप्त मानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ ॥ एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः ॥५९॥ सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां ॥ श्रौतार्थस्याविर्तक्यत्वान्मायायां सर्वसंभवः ॥६०॥
अयं यत्सृजते विश्वं तदन्यथयितुं पुमान् ॥ न कोपि [illegible] शक्तस्तेनायं सर्वेश्वर इति श्रुतः ॥ ६१॥

ह ॥ मायायामिति ॥६०॥ ननु नुकूलयुक्त्यभावे श्रुतिरपि ग्रावप्लववाक्यवदर्थवादः स्यादित्याशंक्य
श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादिकमुपपादयति ॥ अयमिति ॥ अयमानंदमयो यज्जाग्र
दादि विश्वं सृजति तत्केनाप्यधाकर्तुं [illegible] शक्यते सोयं सर्वेश्वर इत्यर्थः ॥६१॥ ६१॥

॥२८॥

रदानीं सर्वज्ञत्वमुपपादयति॥ अशेषेति॥ तत्र सूक्ष्मसंगतानेककारणानेककार्यरूतानां सर्वप्राणि
बुद्धीनां वासनाः निवसंति ताभिश्च वासनाभिः सर्वजगत्क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवा
सनावदशीनोपाधिकत्वेन सर्वज्ञ इत्यर्थः॥६१॥ ननु यदि सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभू

अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः॥ ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ
ईश्वरः॥६१॥ वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते॥ सर्वबुद्धिषु तद्दृष्ट्वा
वासनास्वनुमीयतां॥६२॥

यत इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह॥ वासनानामिति॥ कथं तर्हि
तदवगम इत्याशंक्याह॥ सर्वबुद्धिष्विति॥ सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणभूतवासनागतस
र्वज्ञत्वपुरःसरं भवितुमर्हति कार्यनिष्ठधर्मविशेषत्वात्॥ पटगतरूपादिवदित्यर्थः॥६२॥

चि॰ दी॰

॥२८॥

सर्वज्ञत्वमुपपाद्येदानीमंतर्यामीति श्रुत्युक्तमंतर्यामित्वमुपपादयति ॥ विज्ञानमयेति ॥ अन्यत्र पृथिव्या
दौ तिष्ठन्नयमयति यस्तेनैव सन्नियंता ॥ ३३ ॥ अस्मिन्नर्थेंतर्यामिब्राह्मणं कृत्स्नं प्रमाणमिति दर्शयितु
न्तदेकदेशमुक्तं विज्ञाने तिष्ठन्नित्यादिवाक्यमर्थतोनुक्रामति ॥ बुद्धाविति ॥ ३४ ॥ इदानीमंतर्यामि

विज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि ॥ अंतस्तिष्ठन्यमयति तेनांतर्यामितां व्र
जेत् ॥ ३३ ॥ बुद्धौ तिष्ठन्नांतरोस्या धियो यं नीक्षते धीर्वपुः ॥ धियमंतर्यमयती
त्येवं वेदेन घोषितं ॥ ३४ ॥ तंतुः पटे स्थितो यद्वदुपादानतया तथा ॥ सर्वोपादा

ब्राह्मणस्य प्रतिपर्यायं व्याख्याने ग्रंथबाहुल्यभयाद्व्याख्यानस्य सर्वपर्यायसंचारित्व
सिद्धये यः सर्वेषु भूतेषु तिष्ठन्निति पर्यायं व्याचक्षाणो यः सर्वेषु भूतेषु तिष्ठन्नित्यस्यार्थं सदृष्टांत
माह ॥ तंतुः पट इति ॥ ३५ ॥

॥२८॥

ननु उपादानतया सर्वत्रायमवस्थितश्चेत्किमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वांतरत्वादि
त्याह॥ परादपीति॥ अत्रेदमनुमानं। आंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वादणुत्वतार
तम्यवदिति॥ १२॥ नन्वांतरत्वे पृथ्व्यादिवदंतर्यामिणो दर्शनं किं न स्यादित्याशंक्य तेषामि
व बाह्यत्वाभावान्न दृश्यत इत्यभिप्रायेणाह॥ द्वित्र्यंतरत्वेति॥ कुतस्तर्हि तन्निर्णय इत्यत आ

परादप्यांतरस्तं तु सत्तो रूपं स्फुरांतरः॥ आंतरस्यैव विश्रांतिर्यत्रासावनुमीयतां॥ १२॥ द्वि
त्र्यंतरत्वकक्षाणां दर्शनेप्ययमांतरः॥ न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः॥ १३॥
पररूपेण संस्थानात्स्वं तोर्वपुर्यथा॥ सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा॥ १४॥

हान्तत इति॥ अचेतनस्य चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्तु द्वाःस्थेत्येव॥ १३॥
पदस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह॥ पररूपेणेति॥ पररूपेणावस्थितस्य तंतोः पटः
शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः॥ १४॥

पः सर्वाणि भूतान्यंतरो यमयतीति वाक्यस्य तात्पर्यं संदर्शयंत माह लोकद्वयेनानंतोरिति। तंतुसं
कोचादिना पटसंकोचादिर्यथा भवति एवं पृथिव्यादिषूपादानेषु स्थितोंतर्यामी यथा वासनया
यथा यथा घटादिकार्यरूपेण विक्रियते तथा तत्तत्काजातं तथा तथा परवशं भवतीति भावः॥ ६९॥ ए
वमंतर्यामी प्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमप्युपन्यस्यति। ईश्वर इति॥ ७०॥ सर्वभूतानामि

अवश्यमेव भवति न स्वातंत्र्यं पटे मनाक् क्वचित्॥
तंतोः संकोचविस्तारश्चलनादौ पटस्तथा॥ ६९॥
तथांतर्याम्ययं यत्र यथा वासनया यथा॥ विक्रियते तथावश्यं भवत्येवं न संशयः॥ ६ ७०॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया॥ ७१॥
सर्वभूतानि विज्ञानमयास्ते हृदयस्थिताः॥ तदुपादानभूतेशस्तत्र विक्रियते खलु॥ ७२॥

तिपदस्यार्थमाह॥ सर्वभूतानीति॥ ते च हृदयपुंडरीके स्थिताः॥ ननु तेषां कुतो हृद्यवस्थान
मित्याशंक्य हृद्यंतर्यामिणो विज्ञानमयाकारेण परिणामादित्याह॥ तदुपादानेति॥ ७२॥ छ॥

यंत्रारूढानीत्यत्र यंत्रारोहणशब्दयोरर्थमाह॥ देहादीति॥ भ्रामयन्निति पदेन प्रकृतस्यार्थमाह॥ विहितेति॥ ८
३॥ इदानीं णिच्प्रत्ययमायापदयोरर्थमाह॥ विज्ञानमयेति॥ ८४॥ श्रोतुस्स्वयमेव यमयतीति पद
स्याप्ययमेवार्थ इत्याह॥ अंतर्यमयतीति॥ उक्तव्याख्यानं पर्यायांतरेष्वतिदिशति॥ पृथिव्यादिष्वि
ति॥ ८५॥ प्रवृत्तिज्ञानस्य सर्वेश्वरत्वानतिरेके वचनांतरमुदाहरति॥ जानामीति॥ ८६॥ ननु प्रवृत्ते

देहादियंत्रमारूढं यंत्रं तद्यो हि मानिता॥ विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत्॥ ८३॥ वि
ज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः॥ स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत्॥ ८४॥
अंतर्यमयतीत्युक्त्यायमेवार्थः श्रुतौ श्रुतः॥ पृथिव्यादिषु सर्वत्र न्यायोयं योज्यतां धिया॥ ८५॥
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ केनापि देवेन हृदि स्थितेन
यथा नियुक्तोस्मि तथा करोमि॥ ८६॥ नार्थः पुरुषकारेणेत्येवमाशंक्यतां यतः॥ ईशः पु

ईश्वराधीनत्वे पुरुषप्रयत्नोऽव्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परि
हरति॥ अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः॥ ८७॥ श्रीरामरुद्राभ्यां नमः॥ छ॥

ननु पुरुषप्रयत्नस्यापीश्वररूपत्वे यमयति यामयतीति प्रतिपादितमंतर्यामिप्रेरणं तस्यास्यादित्या
शंक्य तद्बोधेन स्वात्मासंगत्वज्ञानलक्षणफलस्य सत्त्वान्मैवमिति परिहरति॥ ईदृगिति॥ ८८॥
ईदृग्बोधेने शास्य पुरुषकारादिरूपेणावस्थानज्ञानेन प्रवृत्तिः॥ अंतर्यामिरूपेण प्रेरणा
आत्मनोऽसंगज्ञानेनापि किं प्रयोजनमित्यत आह॥ तावतेति॥ श्रुतिस्मृत्युदितस्यानतिलंघ

ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां॥ तथापीशस्य बोधेन स्वात्मासंगत्वधीजनिः॥८८॥
तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा॥ श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितं॥८९॥
आज्ञाया भीतिहेतुत्वं भीषास्मादिति हि श्रुतं॥ सर्वेश्वरत्वमेतत्स्यादंतर्यामित्वतः पृथक्
॥९०॥ एतस्य वाक्षरस्य प्रशासन इति श्रुतिः॥ अंतः प्रविष्टः शास्तायं जनानामिति च श्रु

नीयत्वे स्मृतिं दर्शयति॥ श्रुतिस्मृतीति॥ ८९॥ श्रुत्यापीश्वरस्य भीतिहेतुत्वमुक्तमित्याह॥ आज्ञा
यायेति॥ ईश्वरस्य भीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वरत्वस्यांतर्यामित्वतः पार्थक्यसिद्ध
यइति मत्वाह॥ सर्वेश्वरत्वमिति॥ ९०॥ बहिरंतश्चेश्वर एव नियामकत्वे श्रुतिद्वयमाह॥ एत

क्रमप्राप्तस्यैषयोनिरित्यस्यार्थमाह॥ जगद्योनिरिति॥ प्रतिज्ञातार्थं प्रभवाप्ययौ हि कृतानामिति शंकायां
हेतुत्वेन योजयति॥ प्रभवेति॥ प्रभवाप्ययावुत्पत्तिप्रलयौ न तु कर्तृत्वात् जगद्योनिरित्यर्थः॥ उत्पत्तिप्र
लयशब्दयोर्विवक्षितमर्थमाह॥ आविर्भावेति॥ उत्पत्तिप्रलयावाविर्भावतिरोभावौ मताविति
योजना॥ ८२॥ आविर्भावप्रकारे सदृष्टान्तमुपपादयति॥ आविर्भावयतीति॥ यथा संकुचित

जगद्योनिर्भवेदेष प्रभवाप्ययकृत्त्वतः। आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ॥ ८२॥
आविर्भावयति स्वस्मिन् विलीनं सकलं जगत्। प्राणिकर्मवशादेष पटो यद्वत्प्रसारितः॥
८३॥ पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत्। प्राणिकर्मक्षयवशात् संकोचितपटो
यथा॥ ८४॥

श्चित्रपटः स्वस्य प्रसारणेन स्वनिष्ठानि चित्राण्याविर्भावयति। एवमीशोपीत्यर्थः॥ ८३॥ तत्स्यै
वत्प्रलयकारणत्वं दर्शयति॥ पुनरिति॥ स एव पटः संकुचितश्चित्राणि यथा तिरोभावयति त
द्वदित्यर्थः॥ ८४॥

61

चि० दी

॥३१॥

आविर्भावतिरोभावयोर्दृष्टांतांतराणि दर्शयति॥ रात्रिघस्राविति॥ घस्रो ह्नः॥८५॥ नन्वीश्वरस्य जगद्योनित्वे किमारंभकत्वेन किं वा तदाकारपरिणामत्वेन नाद्यः। अद्वितीयस्यारंभकत्वायोगात् न द्वितीयः निरवयवस्य परिणामासंभवादित्याशंक्य विवर्त्तवादाश्रयणान्नायं दोष इति परिहरति॥ आविर्भावेति॥८६॥ नन्वेकरूप ईश्वरः कथं चेतनाचेतनजगदुपादानं भविष्यतीत्याशंक्योपाधिप्राधान्येनाचेतनोपादानं चि

रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने॥ तूष्णींभावमनोराज्ये इव सृष्टिलयाविमौ॥८५॥
आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना॥ आरंभपरिणामादिचोद्यानां नात्र संभवः॥८६॥
अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा॥ चिदाभासांशतस्त्वेष जीवानां कारणं भवेत्॥८७॥
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां॥ परः कारणतामेति भावनाज्ञानकर्मभिः॥८८॥

त्प्राधान्येन चेतनोपादानं च भविष्यतीत्याह॥ अचेतनानामिति॥८७॥ ननु मायाविन ईश्वरस्य जगत्कारणत्वे प्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मान एव तदभिध्यानादि शंकते॥ तमःप्रधान इति॥ तमःप्रधानः तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावना संस्काराः ज्ञानं देवताध्यानादि। कर्म पुण्यापुण्यलक्षणं। तैर्निमित्तभूतैरित्यर्थः॥८८॥ रामकृष्णाख्यो नमः॥

॥३१॥

त्वंपदार्थस्वतत्पदार्थयोर्व्यधिष्ठानारोप्ययोरन्योन्याध्यासस्याविवक्षितत्वान्मैवमितिपरिहरति॥ननतत्वा॥९॥
अन्योन्याध्यासमिति॥ननुसुरेश्वराचार्यैरीश्वर■लक्षणयोरन्योन्याध्यासः सिद्धवत्कृतस्य व्यवह
तरतिकुतोवगम्यतइत्याशंक्य भस्यार्थपर्यालोचनवशादितिदर्शयितुं श्रुतिमर्थतः पठति॥
ससमिति॥९॥भवत्वेषाश्रुतिरनयाकथमन्योन्याध्यासावगतिरित्यतआह॥आपा

रतिवार्त्तिककारेणजडचेतनहेतुता॥परमात्मनएवोक्तानेश्वरस्येतिचलतन्तु॥९०॥अन्यो
न्याध्यासमत्रापिजीवकूटस्थयोरिव॥ईश्वरब्रह्मणोः सिद्धं कृत्वाब्रूतेसुरेश्वरः॥१०॥स
संज्ञानमनन्तंयद्ब्रह्मतस्मात्समुत्थिता॥खवाय्वग्निजलोर्व्योषध्यन्नदेहाइतिश्रुतिः॥११॥
आपातदृष्टितस्तत्रब्रह्मणोभातिहेतुता॥हेतोश्चसत्यता■तस्मादन्योन्याध्यासइ

ष्यतेतिगतन्त्रतस्यांश्रुतौसत्यादिलक्षणस्यनिर्गुणस्यब्रह्मणोजगत्कारणत्वंजगत्कारणस्यमाया
धीनचिदाभासस्यचसत्त्वमापाततः प्रतीयमानमन्योन्याध्यासमन्तरेणनघटतइति
भावः॥१२॥

एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वत्रोदाहृतं घटिलपटदृष्टांतस्मारणेन दृढयति॥ अन्योन्येति॥१३॥ आंशैकत्वापन्नो दृष्टांत मेभिश्चायापोह दार्शिनी भेदाप्रतीतो पूर्वोक्तमेवदृष्टांतांतरं दर्शयति॥ मेघाकाशेति॥ दृश्यं पश्यंतीति न भेदनिश्चयः॥१४॥ कुतस्तर्हि ब्रह्मेशयोर्भेदव्यवहारमिति रिस्यत आह॥ उपक्रमादिभिरिति॥ उपक्रमोपसंहाराभ्यासोऽपूर्वताफलं॥ अ

अन्योन्याध्यासरूपोसावन्नलिप्तः पटो यथा॥ घटिलेनैकतामेति तद्वंशैकतां गतः॥१३॥
मेघाकाशमहाकाशौ विविच्येते न पामरैः॥ तद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः॥
१४॥ उपक्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात्॥ असंगं ब्रह्म मायावी सृजत्येष
महेश्वरः॥१५॥ सत्यज्ञानमनंतं चेत्युपक्रमोपसंहृते॥ यतो वाचो निवर्तंत इत्यसंगत्व
निर्णयः॥१६॥

र्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इत्युक्तैः षड्विधैर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावी सृष्टेत्यवगम्यत इति शेषः॥१५॥ श्रुतावुपक्रमोपसंहारैकरूप्यप्रदर्शनेनोक्तं ब्रह्मणोऽसंगत्वं स्पष्टयति॥ सत्यमिति॥ अतोऽसंगत्वे निर्णयोऽत्र भवतीति शेषः॥१६॥ राम नाम

मायाविन ईश्वरस्य स्रष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति ॥ मायीति ॥ अस्मान्मायी सृजते वि
श्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं
दर्शयतीत्यर्थः ॥१७॥ एवमानंदमयस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिक्रम
माह ॥ आनंदमय इति ॥ ईक्षितत्वाच्च हिरण्यगर्भादिसृष्टिक्रमः ॥ तत्र दृष्टांतमाह ॥ सुप्तीति ॥१८॥

मायी सृजति विश्वं तन्निरुद्धस्तत्र मायया ॥ अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ॥१७॥
आनंदमयकोशोऽयं बहु स्यामिति सवैक्षत ॥ हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत् ॥१८॥
क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति ॥ द्विविधश्रुतिसद्भावाद्द्विविधस्य प्रदर्शनात् ॥१९॥

तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्वमसृजतेति
युगपच्छ्रवणाच्च कृत्स्नोपादेयत्वं कस्य वा हेयत्वं भिन्नाकांक्षायां श्रुतिद्वयस्योपेतत्वादुभयं
ग्राह्यमित्याह ॥ क्रमेणेति ॥ एषा जगत्सृष्टिर्द्विविधश्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रु
तिज्ञेयेति योजना ॥ तत्रोपपत्तिर्द्विविधस्य प्रदर्शनादिति ॥ लोके क्रमयुक्तस्याक्रमयुक्तस्य

च स्वप्नपदार्थस्य तस्य दर्शनादिति भावः ॥१९॥

हिरण्यगर्भस्य स्वरूपं निरूपयति ॥ सूत्रात्मेति ॥ सूत्रात्मापरे सूत्रमिव जगत्सु अनुस्यूत आत्मा स्वरूपं यस्य स सूक्ष्मदेहरूपाख्या यस्य स तथाविधः ॥ सर्वजीवघनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिरूपः तत्र हेतुः सर्वाहंमानेति । सर्वेषु व्यष्टिलिंगशरीरेषु अहमभिमानवत्त्वादिति भावः ॥२०॥ हिरण्यगर्भविषयां जगत्प्रतीतौ दृष्टांतमाह ॥ प्रसु

सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः ॥ सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमान् ॥२०॥ प्रसुषे वा प्रदोषे वा मग्नो मंदे तमस्ययं ॥ लोको भाति यथा तद्वदस्पष्टं जगदीक्ष्यते ॥१॥ सर्वतो लांछितो मष्या यथा स्याद्घट्टितः पटः ॥ सूक्ष्माकारैस्तथेशस्य वपुः सर्वत्र लांछितं ॥२॥

षट्ति ॥ प्रसुषः उषःकालः ॥१॥ एवं लोकप्रसिद्धदृष्टांतमभिधाय यथा घोत इति सर्वोक्तश्लोके अभिहितं लांछितपटदृष्टांतयति ॥ सर्वत इति ॥ यथा घट्टितः पटो मषीमयेराकारविशेषैर्लांछितो भवति तथा मायिन ईश्वरस्य वपुरपंचीकृतभूतकार्यैर्लिंगशरीरैर्लांछितमित्यर्थः ॥२॥

गुह्याशोहायवैभवादृदृष्टांतांतरमाह॥सस्यंवेति॥३॥एवंसूत्रात्मस्वरूपंविराडादीश्वरतस्येवास्का
मेदंपंचीकृतभूतकार्योपाधिकंविराजंदृष्टांतत्रयेणविराडयति॥आतपेति॥सूर्यादयानंतर
मातपेनप्रकाशितोलोकआतपाभातलोकः॥४॥तत्सद्भावेप्रमाणमाह॥विश्वरूपेति॥विश्व
रूपाध्यायादौश्रीहस्वयमुदितमित्यर्थःकाक्षायांब्रह्मादिस्तंबपर्यंतजगद्रूपमुदितमित्याह॥धा

सस्यंवाशाककुजातंवासर्वतोंकुरितंयथा॥कोमलंतद्वदेवैषपेलवोजगदंकुरः॥३॥आत
पाभातलोकोवापरोवावर्णविकृतः॥सस्यंवाफलितंयद्वत्स्थास्नुरेवपुविराट्॥४॥वि
श्वरूपाध्यायएषउक्तःसूक्तेपिपौरुषे॥धात्रादिस्तंबपर्यंतानेतस्यावयवान्विदुः॥५॥ई
शसूत्रविराड्वेधोविष्णुरुद्रेन्द्रवह्नयः॥विघ्नभैरवमैरारमारिकायक्षराक्षसाः॥६॥

ज्ञादाति॥५॥एतावतापद्भूतेकिमायातमित्याशंक्यांतर्यामिप्रभृतिकुद्दालकादिपर्यंतंवस्तुजातंप्र
त्येकमीश्वरत्वेनपूज्यतामित्याह॥ईशेत्यादिना॥६॥तंयथायथोपासतेतदेवभवतीतिश्रुति
सिद्धस्तुजातस्येश्वरत्वेसद्भावेप्रमाणमित्याह॥यथायथेति॥७॥

चि० दी०

॥३४॥

ननु सर्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशंक्य पूज्यानामधिष्ठानानानां पूजानामर्च्यादीनां च सा-
त्त्विकादिभेदेन वैषम्यमित्याह ॥ फलोत्कर्षेति ॥९॥ सांसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्यो-
पासनाद्भवतीत्याशंक्य ज्ञानव्यतिरेकेण न केनापि भवतीत्याह ॥ मुक्तिरिति ॥ तत्र दृष्टान्त-
माह ॥ स्वप्नबोधमिति ॥ स्वजागरणमन्तरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्त्तते तथा ब्रह्म-

विप्रक्षत्रियविट्शूद्रा गवाश्वमृगपक्षिणः ॥ अश्वत्थवटचूताद्या यवव्रीहितृणादयः ॥७॥
जलपाषाणमृत्काष्ठवास्याकुद्दालकादयः ॥ ईश्वराः सर्व एवैते पूजिताः फलदायिनः ॥
८॥ फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः ॥ यथा यथोपासते तं फलमीयुस्तथा तथा ॥
मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा ॥ स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा ॥१०॥

तत्त्वज्ञानमन्तरेण तदज्ञानकल्पितस्वसंसारो न निवर्त्तत इति भावः ॥१०॥ ननु द्वैतनिवृ-
त्तिलक्षणाया मुक्तेः स्वप्नदृष्टान्तेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं निवर्त्यस्य द्वैतस्य
स्वप्नतुल्यत्वाभावादित्याशंक्यान्यथाग्रहणरूपत्वेन स्वप्नतुल्यत्वमस्यैव त्रयमेतत्सुषु-
प्तं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वान्मैवमित्याह ॥ अद्वितीयेति ॥ ईशजीवादिरूपे

॥३४॥

नन्वीशजीवयोर्ब्रह्माभिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदंतःपा
तित्वमित्याह॥ आनंदमयेति॥१२॥ ताभ्यां सर्वं प्रकल्पितमित्युक्ते तत्र केन कियत्कल्पितमि
त्याकांक्षायामाह॥ ईक्षणादीति॥ स ईक्षत लोकान्नु सृजा इत्यादिश्रुत्या एतया द्वारा प्रापद्य
तिं स्यं तया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका। तस्य त्रय आवसथा इत्यादिश्रुत्या एत
तमेव पुरुषं ब्रह्म ततममपश्यदित्यंतया प्रतिपादितः संसारो जीवकर्तृक इत्यर्थः॥१३॥

अद्वितीयब्रह्मतत्त्वस्वप्नोयमखिलं जगत्। ईशजीवादिरूपेण चेतनाचेतनात्मकं॥११॥
आनंदमयविज्ञानमायावीश्वरजीवकौ॥ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं॥
ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिता॥ जाग्रदादिविमोक्षांतः संसारो जीव
कल्पितः॥१३॥ अद्वितीयं ब्रह्मतत्त्वमसंगं तन्न जानते॥ जीवेशावपि मायिकौ वृथैव
कलहं ययुः॥१४॥ ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयं॥ अनुशोचाम एवान्या

नन्वु ब्रह्मण एव पारमार्थिकत्वे वादिनां जीवेश्वरतत्त्वविषया विप्रतिपत्तिः कुत इत्याशंक्य भ्रांतिसि
द्धत्वेन भ्रमत्वादित्याह॥ अद्वितीयमिति॥१४॥ जीवेश्वरविषया यावादिविप्रतिपत्तिप
रत्वान मूलत्वेन तथाविधत्वं तेषां धनीया इत्याशंक्य तथात्म त्वान्येत्याह॥ ज्ञात्वेति॥१५॥

चि॰ दी॰

॥३५॥

ईश्वरे जीवे च भ्रांता विप्रतिपन्ना वादिनो विभज्य दर्शयति॥ त्याचैकादीति॥१६॥ कुतो भ्रांतत्वं तेषामित्यत आह॥ अद्वितीयेति॥ ततः किं तत्राह॥ तेषामिति॥ परिगृहीतपक्षप्रतिपादनाभिनिवेशेन चित्तविभ्रांसभावान्नैहिकमपि सुखं तेषामित्यर्थः॥ क्वेह वा सुखमिति॥१७॥ ननु तेषां ब्रह्मविद्याभावेपि इतरविद्याप्रयुक्त उत्तमाधमभावो दृश्यते। अत उत्तमत्वप्रयुक्तं सुखं को

त्याचैकादियोगांता ईश्वरभ्रांतिमाश्रिताः॥ लोकायतादिसांख्यांता जीवविभ्रांतिमाश्रिताः॥१६॥ अद्वितीयब्रह्मतत्त्वं न जानंति यदा तदा॥ भ्रांता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखं॥१७॥ उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं॥ स्वप्नस्थराज्यभिक्षाभ्यां न बुद्धः स्पृश्यते सुखं॥१८॥

केषांचित्स्यादित्याशंक्य तस्य मुमुक्षुभिरनादरणीयत्वं दृष्टांतेनाह॥ उत्तमेति॥१८॥ जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावान्न मुमुक्षुभिस्तत्र मतिर्निवेशनीयेत्युपसंहरति॥ तस्मादिति॥ तर्हि किं कर्तव्यमित्याशंक्य श्रुतिविचारेण ब्रह्मबोध एव कर्तव्य इत्याह॥ किंतु ब्रह्मेति॥१९॥ मूलं॥ तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः॥ कार्या किंतु ब्रह्मतत्त्वं विचार्य बुध्यतां च तत्॥१९॥

॥३५॥

ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवादयोरेव बुद्धि
न परिसमापनीयेत्याह॥ पूर्वपक्षेति॥ एतावता पूर्वपक्षतया तत्त्वनिश्चयसंभवेन तयोर्जी
वेशवादयोरेवान्ते विवेकृतां नश्यत्योऽनिमज्जस्येति योजना॥२०॥ ननु सांख्ययोगशा
स्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन भवद्भिरभ्युपादेयत्वान्न तयोः पूर्वपक्षत्वमिति शंके

पूर्वपक्षतया तौ चेत्तत्त्वनिश्चयहेतुतां। प्राप्नुतोऽस्तु निमज्जनं तयोर्नैतावतावशः॥२०॥
असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः। योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चे
न्न तत्॥२१॥ न तत्त्वमोरुभावर्थावस्मत्सिद्धान्ततां गतौ। अद्वैतबोधनायैव सा कक्षा का
काचिदीक्ष्यते॥२२॥

असंगचिदिति॥ सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वे तयोर्वस्तुवभेदस्यानंगीकृतत्वा
भाव्यमस्मत्सिद्धान्तत इत्याह॥ न त्विति॥२१॥ तत्त्वंपदयोरुभावर्थौ अस्मत्सिद्धान्तत्वं न गताविति
न तु कूटस्थब्रह्मेशाख्यौ यौ शुद्धौ तत्त्वंपदार्थौ भवद्भिरपि भिन्नौ निरूपितौ इत्याशंक्याह॥ अ
द्वैतबोधनायैवेति॥ लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनानुदितौ

न तु ज्ञानभेदः प्रतिपाद्यत इति भावः॥२२॥

तर्हि पदार्थशोधनं किमर्थमित्याह ॥ अनादीति ॥ अत्र मायाशब्देन स्वाश्रयव्यामोहिकाऽविद्या लक्ष्यते ॥ तया वि
परीतज्ञानं प्राप्तः कर्तृत्वादिमत्वं जीवस्य सर्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य पारमार्थिकं मन्यते अ
तस्तन्निवृत्त्यर्थमेव शोधनं क्रियत इति भावः ॥ २३ ॥ पदार्थशोधनप्रकारमेव दिदर्शयिषुस्तदु
पायत्वेन प्रवृत्तिं दृष्टान्तं स्मारयति ॥ अत एवेति ॥ यतः पदार्थशोधनं कर्तव्यमत एव सर्वः ॥ २४ ॥

अनादिमायया भ्रान्तो जीवेशौ सुविलक्षणौ ॥ मन्यते तद्व्युदासाय केवलं शोधनं तयोः ॥ २३ ॥
अत एवात्र दृष्टान्तो योग्यः प्राक्सम्यगीरितः ॥ घटाकाशमहाकाशजलाकाशाभ्रखात्मकः ॥ २४ ॥
जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः ॥ आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ ॥ २५ ॥
एवमानन्दविज्ञानमयौ मायाधियोर्वशौ ॥ तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले ॥ २६ ॥

पदार्थशोधनप्रकारमाह ॥ जलाभ्रेति ॥ ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वादपारमा
र्थिके तयोराधारभूतौ घटाकाशमहाकाशौ सुनिर्मलौ जलाभ्रोपाधिनिरपेक्षाकाशमा
त्ररूपावित्यर्थः ॥ २५ ॥ दार्ष्टान्तिकमाह ॥ एवमिति ॥ २६ ॥ श्रीसाम्बमूर्तिर्जयति ॥ राम

ननु पदार्थद्वयशोधनकक्षोपयोगित्वेनापि सांख्ययोगमतद्वयमंगीकार्यमिति चेदसत्यमिदमु
च्यते इतरेषामपि शास्त्राणां तत्तत्कक्षोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह ॥ एतदिति ॥ २८ ॥ कु
तस्तर्हि सांख्ययोगयोर्वेदांतविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरतटस्थलक्षणे

एतत्कक्षोपयोगेन सांख्ययोगौ मतौ यदि ॥ देहोऽन्नमयकक्षत्वादात्मत्वेनाभ्युपेयताम् ॥ २८ ॥
आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयम् ॥ त्यज्यते तैस्तदा सांख्ययोगवेदांतसम्मतिः ॥ २९ ॥
जीवोऽसंगत्वमात्रेण कृतार्थ इति चेत्तदा ॥ स्रक्चंदनादिनित्यत्वमात्रेणापि कृतार्थता ॥ २९ ॥
यथा स्रगादिनित्यत्वं दुःखदा तथात्मनः ॥ असंगत्वं न संभाव्यं जीवतोऽजगदीशयोः ॥ ३० ॥
अवश्यं प्रकृतिः संगं पुरेवापादयेत्तथा ॥ नियच्छसे नमीशोऽपि कोऽस्य मोक्षस्तथा सति ॥ ३१ ॥

तमाह ॥ आत्मभेद इति ॥ २९ ॥ ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधेनेत्याशंक्याद्वै
तज्ञानमन्तरेणासंगत्वादिकं न संभाव्यत इत्यभिसंधिं हृदि निधायोत्तरमाह ॥ जीव इति ॥ २९ ॥ अ
भिसंधिमाविःकरोति ॥ यथेति ॥ जीवत्वे विशिष्य विशेषणाकारेण भासमानयोरित्यर्थः ॥
३० ॥ असंभवमेव स्पष्टयति ॥ अवस्थेति ॥ फलितमाह ॥ कोऽस्येति ॥ ३१ ॥ राम राम जयराम

संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः पुनः संगाद्युत्पत्तिरिति शंकते। अविवेकेति॥ एवं सत्यपसिद्धांतापात इति परिहरति। बलादिति। अयं भावः। अविवेको नाम किं विवेकाभावः किं वा तदन्यः। उत तद्विरोधी। नाद्यः। अभावमात्रस्य भावकार्यजनकत्वायोगात्। न द्वितीयः विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात्। तृतीये तु तस्य भावरूपाज्ञानत्वमेवेति मायावा

अविवेककृतः संगो नियमश्चेति चेत्तदा॥ बलादापतितो मायावादः सांख्यस्य दुर्मतेः॥३२॥
बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यताम्॥ इति चेन्न यतो माया व्यवस्थापयितुं क्षमा॥३३॥
दुर्घटं घटयामीति विरुद्धं किं न पश्यसि॥ वास्तवौ बंधमोक्षौ तु श्रुतिर्न सहते तराम्॥३४॥

दप्रसंग इति॥३२॥ आत्मद्वैताभ्युपगमे बंधमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्तव्य इति चोदयति। बंधमोक्षेति॥ एकस्यात्मनो मायया बंधमोक्षव्यवस्थोपपत्तेर्मैवमितिपरिहरति। न यत इति॥ मायापि कथं व्यवस्थापयितुं शक्नोतीत्याशंक्य तस्या दुर्घटकारित्वस्वाभाव्यादित्याह॥ दुर्घटमिति। बंधस्याविद्यकत्वेपि मोक्षो वास्तवोभ्युपेतव्य इत्याशंक्य श्रुतिविरोधान्मैवमित्याह। वास्तवमिति। न सहते तरामतितरां नैव सहत इत्यर्थः। बंधमिव मोक्षमपि वास्तवं न सहत इति भावः॥३४॥ राम

॥३

मोक्षादेर्वस्तुत्वप्रतिषेधिकां श्रुतिं पठति। न निरोध इति। निरोधो नाशः उत्पत्तिर्देहसंबंधः बद्धः सुखदुःखादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसंपन्नो मुक्तः निवृत्ताविद्य इत्येतत्सर्वं वस्तुतो नास्तीत्यर्थः॥२५॥ एवं जीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुपसंहरति मायाख्याया इति॥२६॥ ननु जीवेश्वरयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वेऽपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥२५॥ मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ॥ यथेष्टं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि॥२६॥ कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि॥ घटाकाशमहाकाशौ वियुज्येते न हि क्वचित्॥२७॥

तद्भेदोऽपि पारमार्थिकः स्यादित्याशंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति। कूटस्थेति॥ नाममात्राद्भेदप्रतीतावपि वस्तुनो भेदाभावे दृष्टांतं दर्शयन्स्मारयति॥ घटाकाशेति॥२७॥

चि०दी०

॥३८॥

एवंभेदस्य मिथ्यात्वसमर्थनेन किं फलमित्यत आह॥ यदद्वैतमिति॥ सदेव सोम्येदमग्र आसीदेकमेवाद्विती-
यं ब्रह्मेति श्रुतौ यदद्वितीयं ब्रह्म प्रतिपादितं तत् देवकालत्रयेऽप्यबाध्यत्वेन वास्तवं न भेद इति भावः॥ कु-
तस्तर्हि सर्वैर्जनैर्देहादिभिरभिनिवेशः क्रियत इत्यत आह॥ वृथा मायेति॥ तत्त्वज्ञानेन रहितत्वाद्भिनिवेशं कुर्वन्ती-
ति भावः॥ ३८॥ ननु प्रपंचस्य मायामयत्वं तत्त्वस्याद्वितीयत्वं च ये वर्णयंति तेऽपि संसारंतो दृश्य

यदद्वैतं श्रुतं सृष्टेः प्रागेतदेवाद्य चोपरि॥ मुक्तावपि वृथा माया भ्रामयत्यखिलान् जना-
न्॥३८॥ ये वदन्तीत्थमेतेऽपि भ्राम्यन्ते विद्ययात्र किं॥ न यथापूर्वमेतेषामत्र भ्रान्तेर-
दर्शनात्॥३९॥ ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः॥ न भाति नास्ति चाद्वै-
तमित्यज्ञानेविनिश्चयः॥ ४०॥

नेदं तत्त्वज्ञानेन किं प्रयोजनमिति शंकितायां वदंतीति॥ किमेवं शास्त्रेषां चिद्व्यवहारेऽप्यपूर्वव-
दभिनिवेशाभावान्नैवमिति पूर्वीरस्तीत्यर्थः॥ ३९॥ ज्ञानिनां भ्रान्त्यभावदर्शयित्वा मज्ञानिनां
निश्चयं तावदाह॥ ऐहिकेति॥ इहलोके भव ऐहिकः पुत्रकलत्रादिपोषणरूपः आमुष्मिकः प-
रलोके भव आमुष्मिकः स्वर्गसुखाद्यनुभवरूपः॥ ४०॥

॥२४॥

तत्वज्ञविनिश्चयस्य ततो वैलक्षण्यं दर्शयति। ज्ञानिनामिति। अद्वैतं पारमार्थिकं भाति च संसारः
स्वपारमार्थिक इति निश्चय इत्यर्थः॥ ततः किं भिन्नाशंक्य स्वस्वनिश्चयानुसारेण फलं भवतीत्या
ह। स्वस्वेति॥४१॥ अद्वैतं भाति सृष्टिः श्रोतव्य एव नानुभवतोऽतो न तन्निश्चय इति शंकते।

ज्ञानिनां विपरीतोऽस्मान्निश्चयः सम्यगीक्ष्यते। स्वस्वनिश्चयतो बद्धो मुक्तोऽहं चेति मन्य
ते॥४१॥ नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात्॥ अशेषेण न भातं चेद्द्वैतं किं भा
सतेऽखिलं॥४२॥

नाद्वैतमिति॥ अनुभवागोचरत्वं मसिद्धमिति परिहरति। नचिद्रूपेणेति॥ घटः स्फुरति प
टः स्फुरतीति घटादिष्वनुस्यूतस्फुरणरूपेण भानादित्यर्थः॥ ननु चिद्रूपत्वस्य भानेऽपि त
त्कैवल्यं न प्रतीयत इति शंकते। अशेषेणेति। साकल्येन भानाभावो द्वैतेऽपि समान इ
त्याह॥ द्वैतं किमिति॥४२॥

एवं दोषसाम्यमभिधाय परिहारसाम्यमाह॥ दिङ्मात्रेणेति॥ दिङ्मात्रेणैव देशेन द्वयोर्द्वैताद्वैतयोरसिद्धः। एतावता कथं परिहारसाम्यमित्याशंक्याह॥ द्वैतसिद्धिवदिति॥ तेन च पक्षे तावन्मात्रं दृश्यप्रतीतिसद्भावेन द्वैतसिद्धिवद्द्वैतनिश्चये द्वाद्वैतसिद्धिरद्वैतनिश्चयापि न किंभवेत्सर्वेसर्वः॥४३॥ एवंवादीप्रकारान्तरेणाद्वैतसिद्धिं शंकते॥ द्वैतेनेति॥

दिङ्मात्रेण विभानं तु द्वयोरपि समं खलु॥ द्वैतसिद्धिवदद्वैतसिद्धिस्तेतावतान किं॥४३॥ द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं॥ चिद्भानं त्वविरोध्यस्य द्वैतस्यातोऽसमे उभे॥४४॥

द्वैतं द्वैतरहितं तयोः परस्परविरोधात्तथा सति द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः॥ ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वादद्वैते प्रतिभासमाने द्वैतस्यासिद्धिरिति चोद्यसाम्यमित्याशंक्याह एवंवादी॥ चिद्भानं त्विति॥ भवन्मते चिद्रूपप्रतीतेरेवाद्वैतप्रतीतित्वा

प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावात् वास्तवाद्वैतविघातित्वमिति परिहरति सिद्धान्ती। एवमि
ति। प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगात् छिद्यमाणे सु प्रत्ययः परिशेषः॥४५॥ परिशेषप्रकारमेव द
र्शयति। अचिंसेति॥ अचिंसा अचिंसा अचिंसारचनारूपयस्य तत्त्वात् तथा विध्वंसकं
जगन्मायैव मिथ्यैवेत्यनेन प्रकारेणानिर्वचनीयतामिथ्यात्वं द्वैतस्य निश्चित्य वास्तवप

एवं तर्हि भ्रमप्युद्वैतमस्तु मायामयत्वतः॥ तेन वास्तवमद्वैतं परिशेषात् हि भासते॥४५
अचिंसारचनारूपं मायैव सकलं जगत्॥ इति निश्चित्य वस्तुत्वमद्वैते परिशेष्यते॥४६
पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः॥ परिशील्य मोवात्र प्रयासेन तेन वदा॥४७॥

द्वैतं परिशेष्यतामित्यर्थः॥४६॥ नन्वेवमद्वैतनिश्चये रतेऽपि पुनः पुनर्द्वैतसत्यत्वं पूर्ववास
नया भाति। सा शंक्यते चित्तशैत्ये पुनः पुनर्मिथ्यात्वं विचारयेदित्याह॥ पुनर्द्वैतस्येति॥ आ
रम्भिरसरदुपदेशादिति चतुर्थाध्यायैर्व्यासेन श्रवणाद्यावर्तनस्य विहितत्वादिति भावः॥४७॥

79

कियंतं कालमित्थं विचारणीयमित्याशंक्य तत्रापरोक्षविद्यायां विचारोऽयं समाप्यत इति विचारकाला
वधेरुक्तत्वाद्द्वैतविचारेऽयं खेद उक्तः। किंतु द्वैतप्रतिभास एव युक्त इत्याह॥ क्रियतामिति॥ ४८॥ न
न्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवतः अपि मम यथा क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनि
वारकत्वमात्मतत्त्वस्यासिद्धमिति शंकते॥ क्षुत्पिपासादय इति॥ किं मच्छब्दवाच्येऽहंकारे दृश्यं

क्रियतां कालमिति चेत् खेदोऽयं द्वैत इष्यतां॥ अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात्॥ ४८॥ क्षु
त्पिपासादयो दृष्टा यथापूर्वं मयीति चेत्॥ मच्छब्दवाच्येऽहंकारे दृश्यतां नेति को वदेत्॥ ४९॥
चिद्रूपेऽपि प्रसज्येरंस्तादात्म्याध्यासतो यदि॥ माध्यासं कुरु किंतु त्वं विवेकं कुरु सर्वदा॥ ५०॥

नतु न मच्छब्दोपलक्षिते चिदात्मनीति विकल्प्याद्यमंगीकरोति॥ मच्छब्दवाच्य इति॥ न द्वितीयः
तस्यासंगत्वादविषयत्वाच्चेति बहिरेव द्रष्टव्यं॥ ४९॥ वस्तुतस्तस्य तादात्म्याध्यासे अपि क्षुत्पिपासास
क्तिः स्यादिति शंकते॥ चिद्रूपेऽपीति॥ एवं तर्ह्यनर्थहेतोरध्यासस्य निवृत्तये सदा वि
वेकः क्रियतामित्याह॥ माध्यासमिति॥ ५०॥ रामराम जयराम जयजयराम रूष्ण॥

मनादिवासनावशात्पुनःपुनरध्यासागमनेनन्निवृत्तये विवेकएवावर्त्तनीयोनोपायांतरमित्याह॥

कटीति॥प१॥ननुविचारेणाद्वैतस्यमायामयत्वं युक्त्यैवसिद्ध्यतिनानुभवतइत्याशंक्याचित्सरच

नात्वलक्षणामिथ्यात्वानुभवस्यस्वसाक्षिकत्वोमैवमितिपरिहरति॥विवेकइति॥प२॥नन्वचि

कटितिसध्यासआयातिदृढवासनयेतिचेन्न॥आवर्त्तयेद्विवेकंचदृढंवासयितुंसदा॥प१॥विवे

कद्वैतमिथ्यात्वंयुक्त्यैवेतिनभण्यतां॥अचित्सरचनात्वस्यानुभूतिर्हिस्वसाक्षिणी॥प२॥चिद

प्यचित्सरचनायदितर्ह्यस्तुनोवयं॥चितिस्तुचित्सरचनांकुमोनिसत्वकारणात्॥प३॥

यत्सरचनात्वंमिथ्यापदार्थलक्षणमुक्तंचिदात्मन्यतिव्याप्तमितिशंकते॥चिदपीति॥प्रागभाव

युतत्वेसतिचित्सरचनात्वंमिथ्यात्वलक्षणमितिविवक्षुरचित्सरचनात्वमात्मनोंगीकरोति॥

नह्यस्वितिः॥तथमंगीकारेपसिद्धांतइत्याशंक्यपरिहरति॥नोवयमिति॥नत्वहेतुमा

ह॥निसत्वेति॥वयंचितिस्तुचित्सरचनानोत्रुमइतियोजना॥प३॥श्रीसांबमूर्त्तिर्जयति॥

चितेर्नित्यत्वं कुतः इत्याशंक्य प्रागभावानुभवाभावान्मैवमित्याह॥ प्रागभाव इति॥ यतश्चितेः प्रा
गभावो नानुभूयते ततो नित्येति योजना॥ इदमत्राकूतं॥ चितेः प्रागभावोस्तीति वदन् प्रष्टव्यश्चित्प्रा
गभावः किं चितानुभूयते उतान्येन॥ नान्येन तस्य जडत्वेनानुभवितृत्वानुपपत्तेः॥ चितानुभूयत
इत्यपि पक्षे किं चिदंतरेणोत स्वेनैव नाद्यः अद्वैतवादे चिदंतरस्यैवाभावात्॥ तत्स्वीकारेपि चि
त्वेति योगित्वस्याभावस्य चिदंतरेणापि ग्रहीतुमशक्यत्वात् तस्याप्यपिग्रहेमाणत्वे घटा

प्रागभावो नानुभूतश्चितेर्नित्यात् तच्चितिः॥ द्वैतस्य प्रागभावस्तु चैतन्येनानुभूयते॥ १५

दिवदचित्वापत्तेः॥ नापि द्वितीयः स्वाभावस्य स्वेन ग्रहीतुमशक्यत्वादिति॥ ननु द्वैतस्य प्रमात्रा
दिभेदरूपत्वात्तदभावस्य चैतन्येनैवानुभवितुमशक्यत्वात्तदनुभवितृत्वेन रागभावाच्च चैतन्यव
देव द्वैतस्यापि नित्यत्वापत्तिरित्याशंक्यानुभवितृत्वेन रागभावोऽसिद्ध इत्यपि परिहरति॥ द्वैत
स्येति॥ जाग्रदादिद्वैताभावस्य सुषुप्त्यौ साक्षिणानुभूयमानत्वात् मम सः साक्षी सर्वस्य साक्षीति श्रु

चि॰दी॰
॥४२॥

प्रतिबंदीविमोचनं शंकते॥ सम्यग्गतिनिसाम्येन समाधत्ते॥ नघेति॥ धीदोषादिरनुपज्यते तु शब्द एव
शास्त्रार्थः॥५८॥ इत्थं तत्त्वं विचार्य तज्जन्यतत्त्वज्ञानफलं विचारयितुं तत्स्तुतिपादिकां श्रुतिं पठति॥ यदे
ति॥ अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मंत्रस्योत्तरार्धे॥ अस्य मुमुक्षोर्हृदि श्रिता ये
कामाः तादात्म्याध्यासमूलाः इच्छादयः संति ते सर्वे यदा यस्मिन्काले प्रमुच्यंते तत्त्वज्ञानेनाध्यास
निरासेन निवर्तंते अथ तदानीमेव मर्त्यः पूर्वं देहतादात्म्याध्यासेन मरणशीलः पुरुषः अमृतः अ

यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः॥ इति श्रौतं फलं दृष्टं नेति चेत्तु दृष्टमेव तत्तापरा

ध्यासाभावेन तद्रहितो भवति॥ तत्र हेतुमाह॥ अत्र ब्रह्म समश्नुत इति॥ अत्रास्मिन्नेव देहे ब्रह्म सत्या
दिलक्षणं समश्नुते सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः॥ श्रुत्या प्रतिपादितं फलं कामनिरासादिलक्ष
णं नानुभवसिद्धं किंतु शास्त्रमेवेति शंकते॥ इति श्रौतमिति॥ समनंतरश्रुतिवाक्यतात्पर्यपर्या
लोचनया तस्य दृष्टत्वं सिद्धमित्यभिप्रायेण परिहरति॥ दृष्टमेव तदिति॥ ५९॥ तामसमर्थं॥ छ
मूलं सम्यग्विचारोत्तोऽस्य धीदोषादिति चेन्नथा॥ अस्तं तु शास्त्रार्थं नत्वेक्षत विशेषतः॥५२॥

॥४२॥

तस्य दृष्टत्वस्पष्टीकरणाय तद्वाक्यमुदाहरन् तस्यार्थमाह ॥ यदा सर्वे इति ॥ अनेन वाक्यशेषेण कामप्रमोक्षस्य ग्रंथिभेदत्वेन व्याख्यातत्वात् ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वान्न प्रसक्तेति भावः ॥ वाक्यशेषस्त्वित्यनेन वाक्येन समर्थः ॥ ६० ॥ ननु लोके कामशब्देनेच्छाभेद एवोच्यतेऽतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्याशंक्याध्यासमूलस्येच्छाविशेषस्य

यदा सर्वे प्रमुच्यन्ते हृदयग्रंथयश्चेति ॥ कामानां ग्रंथिस्वरूपेण व्याख्यानाद्वाक्यशेषतः ॥ ६१ ॥ अहंकारचिदात्मनोरैक्यात् अविवेकतः ॥ इदं मे स्यादिदं मे स्यादितीच्छाः कामशब्दिताः ॥ ६२ ॥ अप्रवेश्य चिदात्मानं पृथक् पश्यन्नहंकृतिं ॥ इच्छंस्तु कोटिवस्तूनि न बाधो ग्रंथिभेदतः ॥ ६३ ॥ ग्रंथिभेदेपि संभाव्या इच्छा प्रारब्धदोषतः ॥ बुद्ध्वापि पापबाहुल्यादसंतोषो यथा तव ॥ ६४ ॥

कामशब्दवाच्यत्वं नेच्छामात्रस्येत्याह ॥ अहंकारेति ॥ ६२ ॥ नन्वध्यासमूलस्यैव कामस्य सान्वयत्वे सतीतरोऽन्वयुक्तः स्यादित्याशंक्याबाधकेच्छा दृष्टत्वेपत एवेत्याह ॥ अप्रवेश्येति ॥ अहंकारे चिदात्मानमप्रवेश्य तादात्म्याध्यासेनानालभ्येत्यर्थः ॥ ६३ ॥ नन्वध्यासाभावे कामानामनुदय एव स्यादित्याशंक्यारब्धकर्मवशात् भोगानुसंतिः संभवतीत्याह ॥ ग्रंथिभेदेपीति ॥ तत्र दृष्टांतमाह ॥ बुद्ध्वापीति ॥ ६४ ॥

चि०दी०

॥४३॥

अध्यासाभावेऽहंकारगतेच्छादेरबाधकत्वं दृष्टान्तद्वयप्रदर्शनेन विशदयति॥ अहंकारेति॥ यथा देहगतव्याध्या-
दिभिरहंकारसाक्षिणो बाधो नास्ति देहसंबंधाभावात्तथा घटवृक्षादिगतैर्जन्मादिभिरेवाध्यासे निरस्ता-
वहंकारगतेच्छादिभिरपीति भावः॥६४॥ चिदात्मनोऽसंगस्यैकरूपत्वात्तत्त्वे मपि कामादिबाधो ना-
स्तीति शंकते॥ ग्रंथिभेदादिति॥ एवंविधबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वादिदं चो-
द्यमस्मदनुकूलमित्याह॥ तन्नविस्मरेति॥६५॥ एवंविधज्ञानाभावएव ग्रंथिरित्याह॥ नैवमिति॥

अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा॥ वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत्॥६४॥ ग्रंथि-
भेदादपि प्राप्यमिति चेत्तन्न विस्मर॥ अयमेव ग्रंथिभेदस्तव तेन कृती भवान्॥६५॥ नैवं जानन्-
ति मूढाश्चेत्सोऽयं ग्रंथिर्न चापरः॥ ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः॥६६॥ प्रवृत्तौ वा निवृ-
त्तौ वा देहेंद्रियमनोधियां॥ न किंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः॥६७॥

ननु ज्ञानिनोऽपीच्छाभ्युपगमे ज्ञान्यज्ञानिनोः कुतो वैलक्षण्यमित्याशंक्य ग्रंथिभेदाभेदाभ्यां वैलक्ष-
ण्यं नकुतोऽपीत्याह॥ ग्रंथितद्भेदेति॥६६॥ कारणान्तराभावमेव विशदयति॥ प्रवृत्ताविति॥
६७॥ उक्तार्थे दृष्टान्तमाह॥ भ्रांतेति॥६८॥ मूलं॥ भ्रान्तश्रोत्रिययोर्वेदपाठकृतोऽभिदा॥
नाहारादावस्ति भेदः सोऽयं न्यायोऽत्र योज्यताम्॥६८॥

॥४३॥

86

ज्ञानिनो ग्रंथिभ्रन्यत्वे गीतावाक्यं प्रमाणयति ॥ न द्वेष्टीति ॥ संप्रवृत्तानि प्राप्तानि दुःखानि न द्वेष्टि निवृत्ता
नि सुखानि न कांक्षति ॥ उदासीनवदवतिष्ठत इत्यर्थः ॥ ग्रंथिभेदाद् ग्रंथिभेदः ॥ ६९ ॥ इदं वाक्यमौदासीन्यवि
धिपरं न तु ग्रंथिभेदे प्रमाणमिति शंकते ॥ औदासीन्यमिति ॥ विधिपरत्वे वच्छब्दो व्यर्थः ॥ स्यादि
ति परिहरति ॥ वच्छब्द इति ॥ ज्ञानिदेहादेरकार्यक्षमत्वादुपवर्जितं न तु ग्रंथिभेदादिसाम्यमिति शंकामु
पहसति ॥ न शक्ता इति ॥ ७० ॥ सवस्तुको दोषस्तत्राह ॥ तत्त्वबोधमिति ॥ दुःशकमसाध्यमित्यर्थः ॥ ७१ ॥

न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ उदासीनवदासीन इति ग्रंथिभिदोच्यते ॥ ६९ ॥
औदासीन्यं विधेयं चेद्वच्छब्दव्यर्थता तदा ॥ न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ॥ ७० ॥
तत्त्वबोधं क्षयव्याधिं मन्यन्ते ये महाधियः ॥ तेषां प्रज्ञातिविशदा किं तेषां दुःशकं वद ॥ ७१ ॥
भरतादेरप्रवृत्तिः पुराणोक्तेति चेत्तदा ॥ जक्षत्क्रीडन्रतिं विंदन्निसक्तोऽश्रावि नं किं श्रुतिः ॥ ७२ ॥

न च स्वस्थाने परिहासोऽयं ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति शंकते ॥ भरतादेरिति ॥ श्रुतिमा
जानानश्योदये सोऽपि परिहरति ॥ जक्षदिति ॥ जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभि
र्वा विषयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति श्रौतं वाक्यं नाश्रौषीरित्यर्थः ॥ जक्षद्भक्षयन् जक्ष भक्ष
हसनयोरिति धातुः ॥ क्रीडन्स्वेच्छया विहरन् रममाणः स्त्र्यादिभिर्नोपजनं स्मरन्निदं शरीरमित्युप

चिं० दी०
॥८४॥

ननु तर्हि पुराणस्य का गतिरित्यसांख्यपुराणमर्यादासीन्यबोधनपरं न तु स्वभावपरमित्यभिप्रेत्याह॥ न ह्याहारादिति॥८३॥ संगो पि कुतस्त्याज्य इत्यत आह॥ संगी हीति॥८४॥ ननु तर्हि मानससंगस्यैव त्याज्यत्वेन तत्संगमूलस्याबाह्यव्यवहारस्तामसत्वादिकं न तेः कथमुच्यत इत्याशंक्य शास्त्रतात्पर्यज्ञानमूलत्वादित्याह॥ अज्ञात्वेति॥ अतो मूढव्यवहारो नात्र विचारणीय इत्याह॥ मूर्खाणामिति॥ तर्हि

न ह्याहारादि संत्यज्य भरतादिः स्थितः क्वचित्॥ काष्ठपाषाणवत् किंतु संगभीता उदासते॥८३॥ संगी हि बाध्यते लोके निःसंगः सुखमश्नुते॥ तेन संगः परित्याज्यः सर्वदा सुखमिच्छता॥८४॥ अज्ञात्वा शास्त्रहृदयं मूढो वक्त्यन्यथान्यथा॥ मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धांत उच्यते॥८५॥ वैराग्यबोधोपरमाः सहायास्ते परस्परं॥ प्रायेण सह वर्त्तंते वियुज्यंते क्वचित् क्वचित्॥८६॥ हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः॥ यथावदवगंतव्यः शास्त्रार्थं प्रविविंचता॥८७॥

किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह॥ अस्मत्सिद्धांत इति॥८५॥ कोसाविस्याह॥ वैराग्येति॥८६॥ वैराग्यादीनामन्योन्यपरिहारेणावस्थानदर्शनात् तद्भेदकारकार्याणां तत्त्वादीनां भेदाद्भेदो वगंतव्य इत्याह॥ हेतुस्वरूपेति॥८७॥ रामराम जय राम समर्थ

॥८५॥

तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति ॥ दोषदृष्टिरिति ॥ ८८ ॥ इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति ॥
श्रवणादीति ॥ आदिशब्देन मनननिदिध्यासने गृह्येते । आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्या-
सितव्य इत्यादिदर्शनसाधनत्वेन श्रवणादिविधानात् श्रवणादेर्ज्ञानहेतुत्वं । तत्त्वमिथ्याविवेचनं द्र-
ष्टृदृश्यस्याहंकारादेश्च सदसज्ज्ञानं । ग्रंथेरनुदयोऽन्योन्याध्यासानुत्पत्तिः ॥ ८९ ॥ उपरतेस्तानि दर्शयति ॥

दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता ॥ असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी ॥ ८८ ॥ श्र-
वणादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं ॥ पुनर्ग्रंथेरनुदयो बोधस्यैते त्रयो मताः ॥ ८९ ॥ यमा-
दिर्धीनिरोधश्च व्यवहारस्य संक्षयः ॥ स्युर्हेत्वाद्या उपरतेरित्यसंकर ईरितः ॥ ९० ॥ तत्त्वबो-
धः प्रधानं स्यात्साक्षान्मोक्षप्रदत्वतः ॥ बोधोपकारिणावेतौ वैराग्योपरमावुभौ ॥ ९१ ॥

यमादिरिति ॥ आदिशब्देन नियमादयो गृह्यंते । धीनिरोधश्चित्तवृत्तिनिरोधलक्षणो योगः ।
किमेतेषां समप्राधान्यमुत नेत्याशंक्याह ॥ तत्त्वबोध इति । तमेव विदित्वातिमृत्युमेति नान्यः पं-
था विद्यतेऽयनायेति श्रुतेरित्यर्थः ॥ इतरयोरुपकारित्वे ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृते-
न । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेच्छांतो दांतोऽपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं प-

89

न्नायेनासहवर्त्तनेविधुज्यंते कश्चित्कश्चिदिति रुक्तं तत्र कारणमाह॥ अत्रयोपीति॥ अनेकजन्मार्जितपुण्य
पुंजपरिपाके अत्रयाणां सहभावो भवति अन्यथा तु प्रतिबंधकपापानुसारेण पुरुषविशेषे कालवि
शेषेण कस्यचित्प्रतिबंधो भवतीति भावः॥८२॥ तत्रापि तत्वज्ञानप्रतिबंधे मोक्षो नास्तीत्याह॥ वै
राग्येति॥ तर्हि वैराग्यादिसंपादनं निःफलमित्याशंक्य प्राप्य पुण्यकृतां लोकाननुषित्वा शाश्वतीः स

त्रयाप्यं संतपकाम्ये महतस्तपसः फलं॥ दुरितेन कश्चित्किंचित्कदाचित्प्रतिबध्यते॥८२॥ वै
राग्योपरती पूर्णो बोधस्तु प्रतिबध्यते॥ यस्य तस्य न मोक्षोस्ति पुण्यलोकस्तपोबलात्॥८३॥ पू
र्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा॥ मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति॥८४॥ ब्र
ह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः॥ देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते॥८५॥

माः॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इति भगवद्वचनात्पुण्यलोकप्राप्तिर्भवतीत्याह॥
पुण्यलोकस्तपोबलादिति॥८३॥ वैराग्योपरती सत्तु प्रतिबंधे जीवन्मुक्तिसुखं न सिद्ध्यतीत्या
ह॥ पूर्णबोध इति॥८४॥ इदानीं वैराग्यादीनामवधिं दर्शयति॥ ब्रह्मलोकेति॥८५॥ राम॥

अवांतरतारतम्यं स्वस्वबुध्या निश्चेयमित्याह॥ द्विशेति॥ ९७॥ ननु तत्वबोधावृत्तामपि रागादिमत्वेन वैषम्योपलंभात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यत इत्याशंक्य रागादेर्व्याख्यादिवद् प्रारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वमसिद्धमेतो नशास्त्रार्थे विप्रतिपत्तव्यमित्याह॥ आरब्धकर्मनानात्वादिति॥ ९८॥ किंतु हि प्रतिपत्तव्यमित्यत आह॥ स्वस्वेति॥ सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाकारं निरवद्यब्रह्मरूपेणा

सुप्तिवद्विस्मृतिः सीमा भवेद्परमस्य हि॥ दिशानया विनिश्चेयं तारतम्यमवांतरं॥ ९६॥
आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा॥ वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः॥ ९७॥
स्वस्वकर्मानुसारेण वर्तंतां ते यथा तथा॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः॥ ९८॥
जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं॥ मायया तदुपेक्ष्यैव चैतन्यं परिशेष्यतां॥ ९९॥

वस्थानं च समानमिति भावः॥ ९८॥ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति॥ जगदिति॥
९९॥ ग्रंथाभ्यासफलमाह॥ चित्रदीपमिति॥ १००॥
म्लं॥ चित्रदीपमिमं नित्यं येनुसंदधते बुधाः॥ पश्यंतोपि जगच्चित्रं ते न मुह्यंति पूर्ववत्॥ १००॥

चि०दी०
॥४६॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभारतीतीर्थविद्यारण्यश्रीचरणशिष्येण रामकृष्णाख्येन विदुषा विरचितं तात्पर्यबोधिनीनामकं चित्रदीपव्याख्यानं समाप्तं॥ श्रीसांबार्पणमस्तु॥

॥९५॥